गोपीनाथपट्टनायककृता

शूद्राह्निकपद्धतिः

संपादकः

प्रो. डॉ. जयकृष्णमिश्रः

स्नातकोत्तरधर्मशास्त्रविभागः,

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहारः, पुरी-३

गोपीनाथपट्टनायककृता

शूद्राह्निकपद्धतिः

संपादकः
प्रो. डॉ. जयकृष्णमिश्रः
धर्मशास्त्राचार्यः, अद्वैतवेदान्ताचार्यः
विद्यावारिधिः (Ph.D.), विद्यावाचस्पतिः (D.Litt.), राष्ट्रभाषारत्नम्,
आचार्यः, स्नातकोत्तरधर्मशास्त्रविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहारः,
पुरी-७५२००३, ओडिशा

स्नातकोत्तरधर्मशास्त्रविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहारः,
पुरी-७५२००३

गोपीनाथपट्टनायककृता

शूद्राह्निकपद्धतिः

भूमिकोपबृंहिता, टिप्पणीसमन्विता च

Gopinath Pattanayak's

SUDRAHNIKA PADDHATIH

Edited with notes and introduction

Published with the partial Financial assistance given by U.G.C. under the authority of Sri Jagannath Sanskrit Vishvavidyalaya, Srivihar, Puri.

सम्पादकः
प्रो. डॉ. जयकृष्णमिश्रः
संग्रामक्लवलेन्, बडशङ्खः
पुरी-७५२००२
फोन- ०६७५२-२२४३४६

Editor :
Prof. Dr. Jayakrishna Mishra
Sangram Club Lane,
Badasankha, Puri-752002
Ph : 06752-224346

प्रथमप्रकाशः- १०००
श्रीपञ्चमी-२००८

First Edition - 1000

Sripanchami-2008

सर्वं स्वत्त्वं सम्पादकेन स्वायत्तीकृतम्

by the Editor

प्रकाशकः-
बहिघरः,
एस्.सि.एस्.कलेज रोड
अमलाक्लव् सन्निकट, पुरी

Publisher :
Bahighara
S.C.S. College Road,
Near Amala Club Road, Puri

मूल्यम्- ७०.००
(सप्ततिरूप्यकाणि)

Price : Rs. 70.00
(Rupees Seventy only)

उपक्रमः

धर्मस्य महत्त्वं सर्वजनविदितम् । अनियतेऽपि संसारे धर्मस्यैव नियतत्वं सर्वैरनुभूयते । अयं धर्मः मानवजीवने इहलोके परत्र चाभिव्याप्य तिष्ठति । पुरुषार्थचतुष्टयस्य प्राप्तिः सर्वेषां मानवानामभिलाषः । पुरुषस्याभिलषितवस्तून्येव पुरुषार्थपदेनोच्यन्ते । धर्मार्थकाममोक्षभेदेन ते पुरुषार्थाः शास्त्रेषु चतुर्धा प्रतिपादिताः । सर्वेषु पुरुषार्थेषु धर्मस्य प्राधान्यं वर्त्तते । मनुष्यजीवनस्य मार्गप्रवर्त्तकरूपेण तथा नियन्त्रकरूपेण धर्म एव सर्वथा वरीवर्त्तते । जीवनस्य सर्वेषु कालेषु साक्षात्-परम्परया वा धर्मस्य प्रभावः वर्त्तते । धर्मेणैवार्थकामौ सिद्ध्यतः । मोक्षरूपत्रिविध-दुःखानामात्यन्तिकनिवृत्तिरपि धर्मेणैव भवति । पुरुषार्थचतुष्टयस्य विशदविवरणं धर्मशास्त्रे एव प्राधान्येन प्राप्यते । धर्मशास्त्रं मनुष्यस्य शृङ्खलितजीवनधारणायैवोपदिष्टम् ।

धर्मशास्त्रे एते पुरुषार्था आश्रमचतुष्टयेषु मनोरमशैल्या प्रतिपादिताः । यथा धर्मपालनं ब्रह्मचर्याश्रमे मुख्यतया विहितम् । गृहस्थाश्रमे धर्म्योपायेनार्थकामयोरर्जनं सेवनं च विहितम् । वानप्रस्थाश्रमे संन्यासाश्रमे च मोक्षे चित्तं निवेश्य कामार्थौ परित्यज्य तत्र च धर्मपालनमुपदिष्टम् । धर्मस्य प्रतिपादकशास्त्रत्वेन धर्मशास्त्रस्यापि महत्त्वं सर्वथा वर्त्तते । धर्मशास्त्रमेव मानवचरित्रस्य नियामकम् । धर्मशास्त्रस्योद्देश्यं प्रत्यक्षसिद्धम् । मनुष्यः स्वाभिलषितपदार्थान् यस्मात् प्राप्तुं शक्नोति तस्य प्रतिपादनमेव धर्मशास्त्रस्योद्देश्यम् । मनुष्यस्य मृत्युरवश्यम्भावी, परन्तु धर्मस्य मृत्युर्नास्ति । अतः स एव सर्वेषां कर्मफलं विचारयति । परलोकेऽपि कर्मानुसारं फलं ददाति । मनुष्यस्य मरणकाले यद्यपि प्रियजनः न कोऽपि सहायको भवति तथापि असौ धर्म एक एव तमनुसरति इत्येव धर्मस्य वैशिष्ट्यम् ।

धर्मशास्त्रस्य प्रविभागाः—

विशालोऽयं धर्मशास्त्रस्य वाङ्मयः शास्त्रकारैः त्रिधा विभज्यते ।

यथा- (१) आचारभागः, (२) व्यवहारभागः, (३) प्रायश्चित्त-भागश्चेति । एते सर्वे विषयाः धर्माधर्माविव प्रतिपादयन्ति । श्रौतस्मार्त्तभेदेन धर्मः द्विधा विभक्तः । श्रुतिप्रतिपादितः धर्मः श्रौतधर्मः । स्मृतिप्रतिपादितश्च धर्मः स्मार्त्तधर्मः । धर्मशास्त्रस्य त्रिषु विभागेषु प्रथमत आचार एव प्रधानस्थानं लभते । आचारस्य महत्त्वमनुभूय मनुः[१] 'आचारः परमो धर्मः' इति प्रतिपाद्याचारस्य श्रेष्ठत्वं व्यनक्ति । परम्पराक्रमेणाचारः सर्वदा परिवर्त्तनशीलः । अतः स्मृतिगताचारः कतिपयेषु स्थानेषु परिवर्त्तितो भवति ।

समाजे मनुष्यः यान् यान् शास्त्रीयनियमान् पालयति त एवाचार-पदेनोच्यन्ते । मनुः[२] धर्ममूलेषु सदाचारस्यास्तित्वं स्वीकृत्य तेनैव धर्मस्य रक्षणार्थमुपदिशति । आचारो हि भारतीयानां धर्मस्य मूलाधारः । सर्वेषु धार्मिकग्रन्थेषु आचारस्य प्राधान्यं वर्त्तते । आचारादेव समाजस्य व्यक्तेश्च समुन्नतिः सम्भवति । अनेनैव प्रकारेणाचारस्य प्राशस्त्यं धर्मशास्त्रेषु प्रतिपादितमस्ति । आचाराध्याये प्रतिपादितेषु विषयेषु मनुष्यस्य दिनचर्या, सर्वेषां वर्णानां कर्त्तव्यवर्णनं, ब्रह्मचारि-गृहस्थाश्रमयोः कर्त्तव्यप्रतिपादनम्, गर्भाधानादन्त्येष्टिपर्यन्तं संस्काराः, ब्रह्मचारिनियमाः, अनध्यायाः, अभक्ष्यभक्षणम्, स्नातकधर्माः, व्रतोपवासाः, दानानि, प्रतिष्ठाः, पञ्चमहायज्ञानामनुष्ठानविधिः, तीर्थस्नानमित्येते विषयाः प्रमुखं स्थानं लभन्ते ।

व्यवहारभागे अष्टादशविवादपदानि विचारितानि । नराणामाचरणेषु यत्र सन्देहो जायते तत्र तन्निर्णयाय राज्ञः समक्षमावेदनपत्रमाध्यमेन योऽभियोगः प्रस्तूयते स एव व्यवहार-नाम्नोच्यते । सन्देहनिराकरणरूपं कर्म व्यवहारनाम्ना व्यपदिश्यते । प्रायश्चित्तभागे नैमित्तिकानां कर्मणां प्रकारः सन्निविष्टः । अध्यायेऽस्मिन् शौचाशौचयोर्वर्णनम्, अधर्मस्य पापस्य च लक्षणं, पापस्य प्रकारभेदाः, पापकर्मणां महापातकातिपातकोपपातक-

---

१. आचारः परमो धर्मः श्रुत्युक्तः स्मार्त्त एव च ।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः ।।मनु.१/१०८

२. श्रुतिस्मृत्युदितं सम्यङ् निबद्धं स्वेषु कर्मसु ।
धर्ममूलं निषेवेत सदाचारमतन्द्रितः ।। मनु. ४/१५५

पातकसङ्करीकरणमलिनीकरणादिषु विभाजनं, तेषां पापानामपनोदनार्थं प्रायश्चित्तप्रतिपादनं, प्रायश्चित्तव्रताङ्गभूत-कृच्छ्र-प्राजापत्य-चान्द्रायणादीनां वर्णनं विहितमस्ति । धर्मशास्त्रस्य सर्वेऽपि विषयाः एषु त्रिष्वध्यायेषु प्रतिपाद्यन्ते ।

स्मार्त्तधर्मः आचार्यविज्ञानेश्वरेण षड्धा विभाजितः । ते यथा- वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति । तेषु प्रथमतः वर्णधर्म-आश्रमधर्म-वर्णाश्रमधर्माणां वर्णनमाचारभागे, गुणधर्मः आचारभागे व्यवहारभागे च, निमित्तधर्मश्च प्रायश्चित्तभागे वर्ण्यन्ते । सामान्यधर्मश्च सामान्यतः सर्वेषु भागेषु आलोच्यन्ते ।

धर्मशास्त्रवाङ्मयस्य प्रविभागाः—

धर्मशास्त्रस्य वाङ्मयोऽत्यन्तं व्यापकः । अतः पि.भि.काणे-महोदयादयः ऐतिहासिकाः धर्मशास्त्रेतिहासं त्रिभिः कालैः विभजन्ति । तद्यथा-

(१) धर्मसूत्रसाहित्यम्- ख्री.पू. ५०० तः ख्री. ३०० पर्यन्तम् ।
(२) स्मृतिसाहित्यम्- ख्री.पू. ५०० तः ख्री. ३०० पर्यन्तम् ।
(३) निबन्धकालः- ख्री. ८०० तः १८०० ख्री. पर्यन्तमेव ।

१. धर्मसूत्रसाहित्यम्—

धर्मसूत्रं वेदाङ्गभूतस्य कल्पसूत्रस्यांश-विशेषः । कल्पसूत्राणि द्विविधानि । श्रौतसूत्राणि, स्मार्त्तसूत्राणि च । स्मार्त्तसूत्राणि द्विधा विभज्यन्ते । यथा- गृह्यसूत्राणि धर्मसूत्राणि च । धर्मसूत्राणि अपि वैदिकशाखावत् भिन्निभिन्नशाखासु भिन्नान्युपलभ्यन्ते । कुमारिलस्य तन्त्रवार्त्तिकानुसारं गौतम-गोभिलादीनां सूत्राणि सामवेदिनः, वसिष्ठादीनामृग्वेदिनः, शंखलिखितादीनां वाजसनेयिनः, आपस्तम्ब-बौधायनादीनां तैत्तिरीयकाः, शौनकादीनामथर्व-वेदिनोऽनुसरन्ति ।

धर्मसूत्राण्यपि बहूनि रचितानि । तत्र गौतम-बौधायन-आपस्तम्ब-हिरण्यकेशि-वसिष्ठ-विष्णु-हारीत-शंखलिखित-वैखानस-अत्रि-पैठीनसि-देवल-शातातप-सुमन्तुप्रभृतीनां धर्मसूत्राणि प्रमुखानि । धर्मसूत्रस्य

मुख्यप्रतिपादितविषयाः यथा- मनुष्यजीवनस्याचारकर्त्तव्ययोः वर्णनम्, वर्णाश्रमधर्माः, द्विजातीनामाह्निककृत्यं, पञ्चमहायज्ञाः, पाकयज्ञाः, संस्काराः, ब्रह्मचारिस्नातकादिनियमाः, श्राद्धकर्म, धर्मस्योपादेयता, वर्णानां कर्त्तव्यानि, वर्णसङ्करधर्माः, पाप-प्रायश्चित्त-व्रताशौचशुद्धिः, व्यवहारपदानि, राजधर्माः, स्त्रीपुंधर्मः, पुत्रभेदाः, उत्तराधिकारादयश्चेति ।

२. स्मृतिसाहित्यम्—

धर्मशास्त्रे मन्वादिप्रणीतानां स्मृतीनां प्रामाण्यं सर्वैरङ्गीक्रियते । धर्मशास्त्रग्रन्थेषु मनुस्मृतेः प्राथम्यं प्राधान्यं च सर्वथा वर्त्तते । स्मृतेरपरं नाम धर्मशास्त्रमिति । धर्मशास्त्रप्रयोजकानां संख्या विंशतिरिति याज्ञवल्क्येन प्रतिपादिता । ते यथा मनु-अत्रि-विष्णु-हारीत-याज्ञवल्क्य-उशनाः-अङ्गिराः-यम-आपस्तम्ब-संवर्त-कात्यायन-बृहस्पति-पराशर-व्यास-शङ्ख-लिखित-दक्ष-गौतम-शातातप-वसिष्ठाः । अन्यत्रापि स्मृतिकाराणां संख्या चत्वारिंशत् प्रदर्शिता । अष्टादशोपस्मृतिकाराणां नामान्यपि स्मृतिषु प्रदर्शितानि सन्ति ।

भारतीयसमाजं व्यवस्थितरूपेण परिचालयितुं स्मृतिकाराणां प्रधानं कर्माऽऽसीत् । समाजे भारतीयव्यवहारज्ञानाय स्मृतीनामनुशीलन-मनिवार्यम् । स्मृतिष्वालोचिताः विषयाः प्रधानतः आचार-व्यवहार-प्रार्यश्चित्तभेदेन त्रिधा विभज्यन्ते । आचाराध्याये धर्मलक्षणानि, चतुर्णां वर्णानां चतुर्णामाश्रमाणां च कर्त्तव्यानि, षोडशसंस्काराणां वर्णनं, तीर्थ-स्नान-दानादीनां वर्णनं, पञ्चमहायज्ञाः, व्रतोपवासादीनां वर्णनं चेति विषयाः प्रतिपादिताः सन्ति । व्यवहाराध्याये अष्टादशव्यवहारपदानि, राज्ञः प्रजापालनमात्मरक्षणमित्येते विषयाः विचारिताः सन्ति । प्रायश्चित्ताध्याये धार्मिकसामाजिककृत्याकरण-जनितपापक्षयाय प्रायश्चित्तविधानानि, प्राजापत्य-चान्द्रायण-कृच्छ्रादीनां स्वरूपाणि, पालनविधानानि च वर्णितानि सन्ति ।

३. निबन्धसाहित्यम्—

निबन्धसाहित्यस्य परिसरः धर्मशास्त्रसाहित्येऽत्यन्तं व्यापकः । निबन्धसाहित्यस्य प्रारम्भकाले टीकाग्रन्थाः विरचिताः । श्रुतिमूलकतया

स्मृतीनां समं प्रामाण्यं विविच्य तेषां सामञ्जस्यसंघटनाय निबन्धकारैः देशभेदेनाचारपद्धतिमवलम्ब्य स्मृतिनिबन्धाः प्रणीताः सन्ति ।

मिथिलायाः धर्मनिबन्धकारेषु श्रीदत्तोपाध्याय–चण्डेश्वर–वाचस्पति–हरिहर–हरिनाथ–रुद्रधर–मिसरुमिश्रादयः प्रमुखाः भवन्ति । वङ्गीयधर्मनिबन्धकारेषु वल्लालसेन–जीमूतवाहन–शूलपाणि–अनिरुद्धभट्ट–गोविन्दानन्द–रघुनन्दन–जगन्नाथतर्कपञ्चाननादयः वैशिष्ट्यं धारयन्ति । दाक्षिणात्यधर्मनिबन्धकारेषु देवणभट्ट–हेमाद्रि–श्रीधराचार्य–माधवाचार्यादयः मुख्यं स्थानं धारयन्ति । काशीनिबन्धकारेषु लक्ष्मीधरभट्ट–नन्दपण्डित–मित्रमिश्र–मदनपाल–मदनसिंहादयः महत्त्वपूर्णाः भवन्ति । महाराष्ट्रीयधर्म–निबन्धकारेषु नारायणभट्ट–अनन्तदेव–कमलाकरभट्ट–नीलकण्ठभट्ट–नागोजिभट्ट–काशीनाथोपाध्यायादयः प्रमुखाः भवन्ति । उत्कलीय–धर्मनिबन्ध–कारेषु भवदेवभट्ट–शतानन्दमिश्र–शङ्खधर–शम्भुकरमिश्र–विद्याकर–बृहस्पति–कालिदासचयनि–गोदावरमिश्र–गजपतिप्रतापरुद्र–नरसिंहमिश्र–विप्रमिश्र–गोपीनाथपट्टनायक–गदाधरराजगुरु–वासुदेवरथादयः प्रामुख्यमावहन्ति ।

शूद्राह्निकपद्धतिकर्त्तुः परिचयः—

शूद्राह्निकपद्धतेः प्रणेता श्रीमान् गोपीनाथपट्टनायकः आसीत् । गोपीनाथः वैष्णवधर्मावलम्बी आसीत् । तस्य पितृपितामहाः नारायणोपासकाः, वैष्णवधर्मपालनतत्पराश्चावर्त्तन्त । स्वग्रन्थादौ सः स्ववंशपरिचयमुपस्थापयति । तदनुसारं सः भरतपट्टनायकस्य पुत्रः, दामोदरपट्टनायकस्य च पौत्र आसीदिति ज्ञायते । तस्य पितामहः दामोदरपट्टनायकः, पिता भरतपट्टनायकश्च धर्मपरायणः, सदाचारशीलः, बहुगुणैरन्वितश्च आस्ताम् । तस्य पिता भरतपट्टनायकः तदानीन्तननृपैः बहुवारं सम्मानितश्चाभवत् । गोपीनाथः जात्या करणः, राजकर्मचारी, सुदक्षप्रशासकः, उत्साही, विविधशास्त्रज्ञः, कर्त्तव्यनिष्ठः, बुद्धिमांश्चासीत् ।

शूद्राह्निकपद्धतेः रचयिता श्रीमान् गोपीनाथपट्टनायकः उत्कलीय आसीत् । उत्कलप्रान्ते षोडशशतके गजपतिप्रतापरुद्रदेवस्य राजत्वकाले वैष्णवधर्मस्य सर्वतोभावेन प्रचारः प्रसारश्चाभवत् । तत्परवर्त्तिनि काले

उत्कलीयजनाः बहुसंख्यायां वैष्णवधर्मे दीक्षिता आसन् । गोपीनाथोऽपि पितृपरम्परया राजसेवानिरत आसीत् । राजानुगतः वैष्णवधर्मोऽपि अनेन स्वीकृतः । ग्रन्थमध्येऽपि बहुषु स्थलेषु असौ वैष्णवधर्माचारस्य प्रशंसापूर्वकमुपस्थापयति । शूद्राह्निकपद्धतौ गोपीनाथः केषाञ्चिदुत्कलीय-धर्मनिबन्धकाराणां शुद्धिगुच्छकार-शुद्धिचन्द्रिकाकार-शुद्धिविवेक-कारादीनां नामान्युद्धरति । एतेषां मतानि नान्यप्रदेशीयैः धर्मनिबन्धृभिरुद्धृतानि सन्ति । एतैः कारणैरसौ गोपीनाथोऽवश्यमुत्कलीय आसीदिति निरूपयितुं शक्यते ।

मादलापाञ्जिग्रन्थे[३] भगवानपण्डा[४]-केदारनाथमहापात्र[५]प्रभृतय ऐतिहासिकाश्च प्रतिपादयन्ति यत् परमविष्णुभक्तः गोपीनाथपट्टनायकः शूद्राह्निकपद्धतिनामकं स्मृतिनिबन्धमेकं विरचितवान् ।

अन्ये केचन ऐतिहासिकाः श्रीयुक्तहरेकृष्णमहताव-प्रभातकुमार-पट्टनायक-आर.डि.वानार्जी-डॉ. भवानीचरणराय-चक्रधरमहापात्र-प्रभृतयः ऐतिहासिकाः प्रतिपादयन्ति यदसौ गोपीनाथपट्टनायकः भरतपट्टनायकस्य पुत्रः मुकुन्ददेवस्य समीपेऽमात्यः आसीत् । परन्तु सत्यनारायणराजगुरु-पि.मुखार्जीप्रभृतयः ऐतिहासिकाः कथयन्ति यदसौ गोपीनाथः पारलाखेमुण्डिराज्यस्य नृपतेः गजपतिनारायणदेवस्य नाबालकावस्थायां तद्राज्यस्य शासनभारं गृहीतवान् । एतेभ्यः प्रमाणेभ्यः प्रतिपादयितुं शक्यते यद् गोपीनाथपट्टनायकः उत्कलभूमौ जनिं लब्ध्वा स्वजीवनमतिवाहितवान् ।

शूद्राह्निकपद्धतिग्रन्थस्य प्रणेता गोपीनाथपट्टनायकः सप्तदशशतकस्योत्तरार्ध एवाजायत । विषयेऽस्मिन् तस्य राजनैतिक-पृष्ठपोषकतामाधारीकृत्य तस्यायं कालः निर्णेतुं शक्यते । गोपीनाथ-पट्टनायकस्य पिता भरत्तपट्टनायकः खुरुधाराज्ञः प्रथममुकुन्ददेवस्य पात्र आसीत् । मतमिदं केदारनाथमहापात्रमहोदयादयः[६] ऐतिहासिकाः

---

३. मादलापाञ्जि, पृ- ६९-७०,७३,७४

४. (क) उत्कलीयधर्मशास्त्र, पृ- १०१

(ख) ओडिशार सांस्कृतिक इतिहास, पृ- १८७

५. खुरुधा इतिहास, पृ- ९१-९३

प्रतिपादयन्ति । तस्माच्चास्य कालः सप्तदशशतकस्यान्तिमार्द्धे अष्टादश-शतकस्य प्रथमचरणे च निश्चेतुं शक्यते ।

ग्रन्थकर्त्तुः राजनैतिकपृष्ठभूमिः–

श्रीमान् गोपीनाथपट्टनायकः राजनीतिनिपुणः, धर्मज्ञः, बहुशास्त्रवेत्ता चासीत् । तस्य राजनैतिकजीवनमत्यन्तं गुरुत्वपूर्णं मन्यते । सः पितृपरम्परा-क्रमेण राजनीतौ प्रविष्ट आसीत् । तस्य पिता भरतपट्टनायकः तदानीन्तन-गजपतेः प्रथममुकुन्ददेवस्य मन्त्रीरूपेण नियुक्त आसीत् । भरतपट्टनायकस्य जीवनचरितं सर्वत्रेतिहासेषु गजपतिना सह सम्बन्धितं दृश्यते । तदनु तस्य पुत्रः गोपीनाथोऽपि राज्ञा राजकर्मणि नियुक्त आसीत् । प्रथमतः सः राजपरिषदि नियुक्तेषु सदस्येषु पाञ्जिआकरणरूपेण नियुक्तिं लब्धवान् । राजपरिषदि गृहीताः सिद्धान्ताः, निर्णीताश्च व्यवहाराः तेन लिपिबद्धाः भवन्ति । परवर्त्तिकालेषु यदा सर्वविधकर्मसु सः प्रवीणः सञ्जातः, ततः कियत्कालपर्यन्तं प्रशासकरूपेण, तदनु मन्त्रीरूपेणापि वर्त्तमान आसीत् । स च गोपीनाथः कांश्चन देवालयानपि निर्मितवानिति ज्ञायते । अन्तिमे तु सः गजपतिसम्बन्धितानि गुप्ततथ्यानि मोगलप्रशासकानां समक्षं प्रकाशितवान् । यस्य परिणामस्वरूपं गजपतिः मोगलप्रशासकैः पराजितः । सोऽपि गोपीनाथः वन्दीत्वेन निगृहीत इति ऐतिहासिकाः प्रतिपादयन्ति ।

शूद्राह्निकपद्धतौ उद्धृतग्रन्थाः ग्रन्थकाराश्च–

शूद्राह्निकपद्धतिः आचारविषयकग्रन्थः । तत्र गोपीनाथपट्टनायकेन शूद्राह्निकपद्धतौ सप्तविंशति ग्रन्थकाराणां षड्विंशतिग्रन्थानां च नामान्युट्टङ्कितानि । तदतिरिक्तं स्मृतिपुराण-कोश-दर्शन-संग्रहादिरूपेण बहून्यपि वचनानि उट्टङ्कितानि ।

इदानीमुद्धृतानां ग्रन्थानां ग्रन्थकाराणां संख्या नामानि च निम्ने प्रदीयन्ते ।

ग्रन्थकाराः–

---

६. (क) खुरुधा इतिहास, पृ- ९३, ११०

(ख) उत्कलीयधर्मशास्त्र (भगवानपण्डा), पृ- १०१

(ग) मादलापाञ्जि (प्राचीसंस्करण), पृ- ६९-७४

	नामानि	कतिवारं	कतिवचनानि
१.	अङ्गिराः	१	२
२.	आपस्तम्बः	२	२
३.	ऋष्यशृङ्गः	१	२
४.	कात्यायनः	२	१
५.	कामधेनुः	१	१
६.	कुल्लूकभट्टः	१	–
७.	गौतमः	५	१८
८.	गौडाः	३	–
९.	जैमिनिः	१	–
१०.	दक्षः	१	१
११.	देवलः	१	१
१२.	पैठीनसिः	१	१
१३.	बौधायनः	१	१
१४.	बृहस्पतिः	१	१
१५.	भाष्यकृत्	१	१
१६.	मनुः	१२	१२
१७.	मेधातिथिः	२	–
१८.	यमः	१	१
१९.	याज्ञवल्क्यः	७	७
२०.	लक्ष्मीधरः	१	–
२१.	वार्त्तिककारः	१	१
२२.	विज्ञानेश्वरः	२	–
२३.	विद्यानिवासः	२	–
२४.	शङ्खः	१	२
२५.	शुद्धिगुच्छकारः	१	–
२६.	संवर्त्तः	२	२
२७.	हारीतः	१	१

ग्रन्थाः–

	नामानि	कतिवारं	कतिवचनानि
१.	कल्पतरुः	३	–
२.	क्रमदीपिका	१	–
३.	कपिलस्मृतिः	१	–
४.	कालादर्शः	१	–
५.	कोषः	१	१
६.	चिन्तामणिः	१	२
७.	जैमिनीयरामायणम्	१	१
८.	नृसिंहपुराणम्	३	३
९.	पद्मपुराणम्	३	१०
१०.	परिशिष्टम्	१	–
११.	पूर्वोत्तरमीमांसा	१	–
१२.	ब्रह्मपुराणम्	६	६
१३.	भगवद्गीता	१	१
१४.	भविष्यपुराणम्	१	१
१५.	मत्स्यपुराणम्	१	१
१६.	मीमांसकसिद्धान्तरहस्यम्	१	–
१७.	महाभारतम्	१	–
१८.	याज्ञवल्क्यसंहिता	१	१
१९.	वराहपुराणम्	१	१
२०.	वाजसनेयसंहिता	४	–
२१.	वायुपुराणम्	१	१
२२.	विष्णुपुराणम्	४	६
२३.	विष्णुसहस्रनामस्तोत्रम्	१	२
२४.	शुद्धिचन्द्रिका	१	१
२५.	शुद्धिविवेकः	१	१
२६.	स्मृत्यन्तरम्	३	–

शूद्राह्निकपद्धतेः प्रतिपाद्यविषयाः—

शूद्राह्निकपद्धतेः प्रणेता गोपीनाथपट्टनायकमहोदयः ग्रन्थेऽस्मिन् चतुर्थवर्णस्य शूद्रस्य श्रौतस्मार्त्तकर्मसु अधिकारविषयं प्रमाणवचनैः निरूपयति । मङ्गलाचरणे सः प्रथमतः सांसारिकमायाबन्धनपरिहारार्थं नारायणं स्तौति । ततश्च स्ववंशपरिचयमुपस्थाप्य पूर्वजान् प्रणमति ।

तत्र चतुर्णां वर्णानां पुराणश्रवणेऽधिकारो वर्त्तते । अतः शूद्रस्य पुराणश्रवणादावधिकारः सिद्ध्यति । पुराणप्रतिपादितेष्वपि वैदिककर्मसु शूद्रस्याधिकारो नास्ति भविष्यपुराणवचनात् । नामकीर्त्तनादीनि तु स्वयमपि शूद्रः कर्त्तुं शक्नुयात् । शूद्रः वैश्वदेवादिकं लौकिकाग्नौ न कृत्वा जलादावेव कुर्यात् । सर्ववर्णसाधारणमहिंसासत्यशौचतीर्थयात्रादिकं शूद्रोऽनुतिष्ठेत् । नित्यनैमित्तिकस्नानदानादिकं ब्राह्मणद्वारा कुर्यात् । शूद्रस्य सहस्रनामपाठादौ अधिकारोऽस्ति । गर्भसंस्कारादीनि कर्माणि वैदिकमन्त्रस्थाने नमःशब्द-प्रयोगेण कुर्यात् । शूद्रस्य द्विजशुश्रूषा प्रधानं कर्म वृत्त्यर्थं धर्मार्थं च । शुश्रूषकाय शूद्राय द्विजाः भोजनवसनादिकं दद्युः । शूद्रः यदि द्विजशुश्रूषया जीवितुं न शक्नोति तर्हि वणिग्वृत्त्या नानाविधैः शिल्पगीतवाद्यादिभिर्वा जीवेत् ।

नित्यनैमित्तिककाम्यश्राद्धान्यपि शूद्रोऽनुष्ठातुं शक्नुयात् । शूद्राचारानुसारं शूद्रः सदा आमान्नेन वैश्वदेवं कुर्यात् । आपन्निमित्तं शूद्रः धनसञ्चयं कुर्यात् । शूद्राणां केशवेषाः नियताः स्युः । अग्नौ आहुतिप्रदानं, प्रणवमन्त्रोच्चारणं, कापिलदुग्धपानं, दर्भोद्धरणं, वेदाभ्यासं, पुरोडाशभक्षणं चैतानि कर्माणि शूद्रः न कुर्यात् ।

विवाहितः शूद्रः दिवसभागमष्टधा विभज्य शास्त्रोक्तविधिना सर्वाणि कर्माणि शय्यात्यागादारभ्य शयनपर्यन्तमनुतिष्ठेत् । शूद्रः रात्रेः चतुर्थयामे ब्राह्मे मुहूर्त्ते शय्यात्यागं कृत्वा नारायणनमस्कारपूर्वकं नित्यकर्माणि समाचरेत् । मूत्रपुरीषादि उत्सर्गानन्तरं शरीरशुद्ध्यर्थं शौचं विदध्यात् । दन्तधावन-स्नानादीनि संपाद्य तिलकं कुर्यात् । ततः सूर्यार्घ्यप्रदानपूर्वकं नमस्कुर्यात् । एतत्पर्यन्तं कर्म दिवसस्य प्रथमे भागेऽनुतिष्ठेत् । द्वितीयभागे शिल्पसंगीतादिशास्त्राणामभ्यासं कुर्यात् । विष्णुसहस्रनामस्तोत्रपाठे भगवन्नामकीर्त्तने च शूद्रस्याधिकारो वर्त्तते । यद्यपि षष्ठसप्तमादिभागे

पुराणश्रवणं विधीयते तथापि काम्यत्वेन द्वितीयभागेऽपि पुराणश्रवणं कुर्यात् । तृतीयभागे पोष्यवर्गाणां साधनं कुर्यात् । पोष्यवर्गाणां पिता–माता–गुरु–भार्या–पुत्राश्रितातिथिप्रभृतीनां पालनार्थं द्रव्यार्जनोपायं चिन्तयेत् । चतुर्थभागे सेवाद्यविरोधेन स्नानं कुर्यात् । ततः तिलकधारणपूर्वकं पद्मपुराणोक्तविधिना तर्पणं कुर्यात् । देवतीर्थेन देवान्, उत्तरीयं कण्ठलम्बितं कृत्वा ऋषीन्, ततश्च दक्षिणाभिमुखोऽञ्जलित्रयं प्रत्येकं पितृपुरुषान् दद्यात् । ततः देवागारं प्रविश्य यथासम्भवोपचारैः सर्वत्र नमःपदेनैव देवान् पूजयेत् । ततः वैश्वदेवमनुतिष्ठेत् । वैश्वदेवान्ते नित्यश्राद्धं कुर्यात् । तत्र गोदोहनकालमात्रं प्रतीक्ष्य सोपकरणमामान्नमतिथये दद्यात् ।

ततः दिवसस्य पञ्चमभागे नियमानुसारं भोजनं कुर्यात् । षष्ठसप्तम–भागौ चेतिहासपुराणाद्यैः नयेत् । अष्टमे लोकयात्रा विधातव्या । सन्ध्याकाले पादौ पाणी च प्रक्षाल्याचमनं कृत्वा भगवन्नामकीर्त्तनाभि–वादनादिकं कुर्यात् । रात्रावपि अनया रीत्या भोजनं तदनुशयनं च कुर्यात् । मत्स्यपुराणानुसारं शूद्रः आमश्राद्धं वृद्धिश्राद्धं च कुर्यात् । तण्डुलचूर्णादिना पिण्डं निष्पाद्य पिण्डनिर्वपणं कुर्यात् । शूद्राह्निकपद्धतौ शूद्राणां श्राद्धानुष्ठानविधिरपि तदनु ग्रन्थकारेण प्रतिपादितः । प्रसङ्गक्रमेण दीपदानश्राद्धविधानमपि ग्रन्थकारेणोपस्थापितम् ।

शूद्राणामाशौचनियमान् ग्रन्थकारः सूक्ष्मातिसूक्ष्ममालोचयति । अन्ते जन्ममरणयोराशौचं प्रतिपाद्य ग्रन्थं परिसमापयति ।

ग्रन्थकारः श्रीमान् गोपीनाथः शूद्राह्निकपद्धतौ बहूनां स्मृतिपुराण–धर्मनिबन्धकाराणां वचनानि उद्धरति, प्रमाणीकरोति आदर्शत्वेन गृह्णाति च । तेषां वचनानां साहचर्येण स्वाभिमतं प्रस्तौति । उत्कलीयसमाचार–परम्परादेशधर्मादीनां प्रतिपादनार्थं धर्ममर्मप्रतिपादनपरः श्रीमान् गोपीनाथपट्टनायकः सर्वेषां स्मृतिवचनानां, धर्मनिबन्धग्रन्थानां च सारमादाय मन्दबुद्धीनां सौकर्याय शूद्राह्निकपद्धतिनामानं निबन्धग्रन्थं विरचितवान् । श्राद्धविषये गोपीनाथः स्वपितृचरणानां भरतपट्टनायकमहोदयानां संग्रहश्लोकं प्रतिपादयति ।

गोपीनाथः स्वबुद्धिबलेनोच्चतरपदवीं प्राप्य तत्रापि स्वपारदर्शितां,

पारङ्गमतां, कर्त्तव्यनिष्ठां च प्रतिपादयति । पितृपरम्परयाऽस्य पितृपुरुषाः शास्त्रज्ञानरता आसन् । अस्य पिता भरतपट्टनायकः विचक्षणसंस्कृतज्ञ आसीत् । ग्रन्थमध्ये गोपीनाथः स्वपितुः संग्रहश्लोकं वारद्वयमुद्धरति । स्वपितुरादेशेन स्वयमिमं ग्रन्थं प्रणीतवानिति ग्रन्थारम्भे प्रतिपादयति । गोपीनाथः वेद–मीमांसा–धर्मशास्त्र–व्याकरणादिषु शास्त्रेषु सुदक्ष आसीदिति तस्य ग्रन्थपरिशीलनाज्ज्ञायते । उत्कलीयधर्मशास्त्रे सः शूद्राचारविषयकममुं ग्रन्थं विरचयन् उत्कलीयजनसमाजं प्रभावयति । अनेन च ग्रन्थरत्ने–नोत्कलीयधर्मनिबन्धसाहित्यं समृद्धं भवेत् । अद्यावधि अप्रकाशितस्यास्य ग्रन्थरत्नस्य प्रकाशनेन सर्वेऽवश्यमुपकृताः स्युः ।

ग्रन्थोऽयं विश्वविद्यालयीयानुदानायोगानुकूल्येन आंशिकमार्थिका–नुदानेन च प्रकाशितोऽस्ति । एतच्चानुदानं श्रीजगन्नाथसंस्कृतविश्वविद्यालय–माध्यमेनैव मया प्राप्तम् । तदर्थमहं विश्वविद्यालयस्य कुलपतिमहोदयेभ्यः, स्नातकोत्तरपरिषदध्यक्षमहोदयेभ्यः, चयनसमितेः सदस्येभ्यः, तत्संपृक्ता–न्येभ्यश्च कार्त्तज्ञवाक्यं व्याहरामि ।

अन्तिमे भगवतः श्रीपुरुषोत्तमस्य चरणारविन्दयोः ग्रन्थमिमं समर्प्य तोषमनुभवामि । इति ।

सम्पादकः

ग्रन्थसङ्केताः

अ.को.	–	अमरकोषः
आ.सा.	–	आचारसारः
का.दी.	–	कालदीपः
का.मा.	–	कालमाधवः
का.सा.	–	कालसारः
कृ.क. नियत.	–	कृत्यकल्पतरुः (नियतकालकाण्डः)
कृ.कौ	–	कृत्यकौमुदी
गौ.ध.सू.	–	गौतमधर्मसूत्रम्
जै.न्या.	–	जैमिनीयन्यायमाला
जै.सू.	–	जैमिनिसूत्रम्
द.स्मृ.	–	दक्षस्मृतिः
प.पु. सृष्टि.	–	पद्मपुराणम् (सृष्टिखण्डः)
पार.गृ.	–	पारस्करगृह्यसूत्रम्
भवि.पु.	–	भविष्यपुराणम्
म.स्मृ. (मन्वर्थ.)	–	मनुस्मृतिः (मन्वर्थमुक्तावलिसहिता)
महाभा. शान्ति.	–	महाभारतम् शान्तिपर्व
मिता. टी.	–	मिताक्षराटीका
मी.न्या.प्र.	–	मीमांसान्यायप्रकाशः
या.स्मृ.	–	याज्ञवल्क्यस्मृतिः
व.ध.शा.	–	वसिष्ठधर्मशास्त्रम्
वि.ध.सू.	–	विष्णुधर्मसूत्रम्
वि.पु.	–	विष्णुपुराणम्
शं.स्मृ.	–	शङ्खस्मृतिः
शु.च.	–	शुद्धिचन्द्रिका
श्रा.का.	–	श्राद्धकाण्डः
श्रा.प्र.	–	श्राद्धप्रदीपः

—o—

विषयसूची

उपक्रमः– **ग–ढ**

१. धर्मशास्त्रस्य प्रविभागाः ग

२. धर्मशास्त्रवाङ्मयस्य प्रविभागाः ङ

३. शूद्राह्निकपद्धतिकर्त्तुः परिचयः छ

४. ग्रन्थकर्त्तुः राजनैतिकपृष्ठभूमिः झ

५. शूद्राह्निकपद्धतौ उद्धृतग्रन्थाः ग्रन्थकाराश्च झ

६. शूद्राह्निकपद्धतेः प्रतिपाद्यविषयाः ठ

ग्रन्थसङ्केताः ण

मूलग्रन्थः– **1-67**

श्रौतस्मार्त्तकर्मसु अधिकारनिरूपणम् 1

नित्यनैमित्तिककर्मणामनुष्ठानप्रकारः 13

शौचम् 16

दन्तधावनम् 20

स्नानम् 25

तिलककरणम् 29

द्वितीयभागकृत्यम् 31

तृतीयभागकृत्यम् 33

चतुर्थभागकृत्यम् 35

वैश्वदेवः 41

नित्यश्राद्धम् 41

भोजनम् 42

शयनम् 46

श्राद्धविधिः 47

श्राद्धपद्धतिः 50

श्राद्धस्थलसंस्कारः 54

दीपदानश्राद्धम् 59

जन्ममरणयोरशौचम् 61

परिशिष्टम् **68-86**

शूद्राह्निकपद्धतिः

श्रीरुद्रः शरणम्

तितिक्षुणा निस्पृहमानसेन
वर्णाश्रमाचारसमुद्यतेन ।
यः प्राप्यते शुद्धतरेण पुंसा
नारायणं तं सततं स्मरामि ।।

श्रीदामोदरपट्टनायकसुतोऽनल्पगुणैरन्वितो
विख्यातो भरतो व्यराजत सदा सम्भावितो भूभुजा ।
तस्य श्रीपतिपादचिन्तनरतस्याज्ञाविशेषावृतो
गोपीनाथकृतिस्तनोति विशदां शूद्राह्निकीं पद्धतिम् ।।

श्रौतस्मार्त्तकर्मसु अधिकारनिरूपणम्

तत्र 'श्रावयेच्चतुरो वर्णानि'[१]ति विधिना श्रावणस्य धनार्जनोपायत्वेन प्राप्तत्वात् तदतिक्रमेण वर्णचतुष्टयमुद्दिश्य श्रावणमात्रं विधीयते । चत्वारो वर्णाः पुराणानि शृणुयुरत एव 'पुराणं शृणुयान्नित्यम्', 'श्रोतव्यमिह शूद्रेण'[२] इत्यादि विधिभिः शूद्रमुद्दिश्य पुराणश्रवणं विधीयते । श्रवणभावनायां च भाव्यानां क्षिप्तानुष्ठानद्वाराऽभ्युदयनिःश्रेयससाधनम् । तत्र पुराणप्रतिपादितवर्णाश्रमविहितकर्मस्वरूपज्ञानं भाव्यत्वेन कल्प्यते । स्वाध्यायाध्ययनभावनायामर्थज्ञानवत् । तदुक्तमर्थवादाधिकरणे वार्त्तिककारैः[३] ।

एतेन भारतादि वाक्यानि व्याख्येयानि । तेषामपि- "श्रावयेत्

---

१. वार्त्तिककार इति श्रा.प्र., पृ- १२९

२. भविष्यपुराणम् इति श्रा.प्र., पृ- १२७

३. जै.सू. १/२/१/१८

४. वार्त्तिककार इति श्रा.प्र., पृ- १२९

चतुरो वर्णान्"[४] इति श्रवणविधेः पुरुषार्थान्वेषणदशायामक्षरादीनतिक्रमधर्मार्थकाममोक्षाः धर्मार्थदुःखसंसारसाध्यसाधनपरित्यागांगभूतं फलमिति । तेन पुराणश्रवणाधिकारिणां तत् तत् पुराणप्रतिपादितेषु कर्मसु अधिकारः । अन्यथा तेषां पुराणश्रवणस्यादृष्टापत्तेः । न च ते युज्यते । दृष्टे[५] सत्यदृष्टपक्षकल्पनाऽनुपपत्तेः । अधीतस्वाध्यायानां त्रैवर्णिकानां स्वाध्यायादेव तत् तत् कर्मस्वरूपज्ञानम् । तदनधिकारिणां तु कुकर्मस्वरूपज्ञानं पुराणश्रवणात् । तैश्च तदनुष्ठानं ततश्च फलमिति श्रवणविधेः दृष्टार्थत्वम् ।

न च अग्निहोत्रादि कर्मणामपि पुराणप्रतिपादनात् तेष्वपि तेषामधिकारापत्तिरिति वाच्यम् । अग्निहोत्रादीनामग्निविद्यासाध्यत्वेनाप्यनग्नीनामविद्यानां तत्राधिकाराभावात् । तत्रैव कर्त्ताविशेषेण प्रतिक्रियम् । योग्यताप्रतिषिद्धत्वाद् विशेषोपपादनायेति वाच्यम् । अत एव कात्यायनेनोक्तम्–

"अङ्गहीना श्रोत्रियपतितषण्ढवर्ज्यम्" इति ।

न च पुराणप्रतिपादितपञ्चयज्ञादिकर्मणामत्र साध्यत्वात् अविद्यानां तेषां कथं तत्राधिकार इति वाच्यम् । पौराणिकमन्त्रसाध्ये कर्मणि पुरा पौराणिकमन्त्रं पाठ्याधिकारादेवाधिकारात् पौराणिकमन्त्राद्यधिकारश्च ।

"न हि वेदेष्वधिकारः कश्चिच्छूद्रस्य विद्यते ।
पुराणेष्वधिकारो हि दर्शितो ब्राह्मणैरिह ।"[६]

इति मत्स्यपुराणात् । एतस्य सूत्रवाक्यत्वेऽपि कौमुतिकन्याये शूद्रविषयत्वसम्भवात् । न च भविष्यपुराणाधिकारे[७]–

"श्रोतव्यमिह शूद्रेण नाध्येतव्यं कदाचन ।"

इति शूद्रस्य पुराणाध्ययननिषेधात्, कथं तस्य पौराणिकमन्त्रपाठमिति

---

५. जैमिनीयं भावार्थाधिकरणम्, २/१/१

६. मत्स्यपुराणमिति श्रा.प्र., पृ- १२७

७. भविष्यपुराणमिति श्रा.प्र., पृ- १२७

वाच्यम् । निषादस्थ[८]पत्यधिकरणन्यायेन सामान्यपुराणनिषेधस्य कर्मोपयोगि-पौराणिक-मन्त्रविशेषाध्ययनविशेषत्वे मानाभावात् । अतो [९]रथकारादेराधानोपयोगो वैदिकमन्त्रपाठवत् शूद्रस्य कर्मोपयोगी पौराणिकमन्त्रपाठे न विरुद्धः । वैदिकमन्त्रसाध्येष्वपि कर्मसु वैदिकमन्त्रस्थाने नमःरूपमन्त्रोद्देश्याधिकारात् ।

"अनुज्ञातोऽस्य नमस्कारो मन्त्रः ।"[१०]

इति गौतमेन वैदिकमन्त्र कार्य एव । नमःशब्दविधानात् तत्रोदकेषु मन्त्राख्येति न्यायेन मन्त्रशब्दस्य वैदिकमन्त्रपरत्वात् ।

"नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत् ।"[११]

इति याज्ञवल्कीये दानपञ्चयज्ञप्रविष्टवैश्वदेवाख्यहोमस्याग्नि-साध्यत्वादनग्नेः शूद्रस्य कथं तत्राधिकार इति वाच्यम् । शूद्रस्यापि पाकसाधनाग्निसम्भवाद् वैश्वदेवस्याग्निसाध्यत्वनियम-भावाच्च ।

"लौकिके वैदिके वाऽपि हुतोत्सृष्टे जले क्षितौ ।
वैश्वदेवस्तु कर्त्तव्यः पञ्चसूनाऽपनुत्तये ।।"[१२]

इति संवर्त्तस्मरणात् उक्तवचनबलेन तत्कर्त्तव्यताऽऽवश्यकतायां जलादावपि तत्करणे विरोधाभावात् । अत एव "शूद्रा वाजसनेयिनाम्" इत्यतिदेशोऽपि साधु सङ्गच्छते । तेषां कर्माधिकाराभावादेतद्वचनं वैयर्थ्यापत्तेः । न च मन्त्राणां प्रयोगसमवेतार्थप्रकाशनद्वारा कर्माङ्ग-त्वान्नमःशब्देन प्रयोगसमवेतस्य कस्यचिदर्थस्य प्रकाशनात् कथं वा मन्त्रत्वम् । केन रूपेण वा कर्माङ्गत्वमिति वाच्यम् । जपादिमन्त्राणां कर्मसमवेतार्थप्रकाशाभावेऽपि अदृष्टद्वारा कर्माङ्गत्ववत् । प्रकृतेष्वप्युपपत्तेः ।

---

८. जै.न्या., ६/१/१३

९. मी.न्या.प्र., पृ- १८६

१०. गौ.ध. २/१/६६

११. या.स्मृ. १/१२१

१२. शातातप इति का.सा., पृ.- ३०३. कृत्यकल्प- १४९

कर्मसमवेतार्थप्रकाशनं तु नावश्यकं स्मार्त्तकर्मसु। वाजसनेयिनां पवित्रकरणादेः केनाप्यप्रकाशनात्। क्वचित्तु ब्राह्मणपठितमन्त्र-द्वारा मन्त्रप्रकाशनम्। न च शूद्रस्य पौराणिकमन्त्रेष्वधिकारसत्त्वे "अमन्त्रस्य शूद्रस्य विप्रो मन्त्रेण गृह्यताम्"[१३] इत्यादौ शूद्राणाममन्त्रत्व-प्रसिद्धविरुद्धः स्यादिति।

अमन्त्रस्येत्यत्र मन्त्रशब्दः समभिव्याहृतनञुक्तजैमिनीय-लक्षणानुसारेण मन्त्रपदं शक्तिविषयाणां वैदिकमन्त्राणाम-भावप्रतिपादनात्। न च पुराणादीनां मन्त्रपदप्रयोगविषयाणां पौराणिकमन्त्राणामप्यभावस्तेन प्रतिपादयितुं शक्यते। गौर्नास्ति इत्यादौ वल्मीकादेरप्यभावः प्रतिपत्त्यापत्तेः। अस्मादमन्त्रविप्रसिद्धिः वैदिकमन्त्रभावकतैव। न च–

"न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम्।"[१४]

इति ब्राह्मणस्य शूद्रे ज्ञानोपदेशप्रतिषेधात् कथं पौराणिकमन्त्राध्ययनमिति वाच्यम्। तत्रत्यमतिशयध्वंसविषयज्ञमतिपरत्वात्। अत एव शूद्रस्य तदनादरादित्यधिकारतो दानश्रुतेः क्षत्रियत्वोपपादनेन शूद्राणां ब्रह्मविद्यायामधिकाराभावो दर्शितः।

स्वत्वभागविषये च शूद्रस्याधिकारो भवत्येव विदुरादेरिव। अधिकरणस्य तु प्रतिषिद्धविधावविषयत्वमिति। काम्येषु कर्मसु न शूद्राणामधिकारः। कामश्रुतीनां नवविवाहिताग्नित्रैवर्णिकाधिकारकत्वे-नैवाधिकार्ये निराकांक्षाया अभावात्। अत एव तत्र रथकारस्य विद्यमान-त्वादुत्तरक्रतुष्वधिकारः। इत्यदृष्टत्वं तस्याधानमीमांसकसिद्धान्त-रहस्यम्। याज्ञवल्क्यसंहितायां त्रैवर्णिकाचार इव शूद्राणामप्याचार-विशेषस्तत्र तत्रोक्तः। तद्यथा–

"शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः।"[१५]

---

१३. शूलपाणि इति श्रा.प्र., पृ– १२७

१४. म.स्मृ. ४/८०

१५. या.स्मृ. १/२१

इति भार्यारत इत्यादि ।

"शूद्रोऽधिकारो हीनोऽपि"[१६] इत्यादिः ।

न च एवं मनुना कथम्-

"एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् ।
एतेषामेव वर्णानां शुश्रूषामनसूयया ।।"[१७]

इति त्रैवर्णिकशुश्रूषाऽतिरिक्तः सर्वकर्माभाव इत्युक्तः । एतद् वचनस्य त्रैवर्णिकशुश्रूषाप्रशंसामात्रपरत्वात् । वृत्त्यर्थत्वेनार्थोपायप्रतिषेधपरत्वाद् वा । अन्यथा सर्ववर्णसाधारणमहिंसासत्यशौचतीर्थयात्रादिविलोपापत्तेः । न चेष्टापत्तिरिति वाच्यम् । वर्णचतुष्टयसाधारणधर्मकथनानन्तरं सर्वसाधारणतया एतेषां पृथक्कथनानुपपत्तेः ।

प्राप्तं तु वराहपुराणे-

"एष एव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः ।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्णाति ।।"

इत्यमन्त्रस्येत्यादि परिभाषा । न च प्रकरणेन परिभाषा नियम्यते । तेन शूद्रेण नित्यनैमित्तिकं स्नानदानादि अदृष्टार्थं कर्म कर्त्तव्यं तद् ब्राह्मण-पठितमन्त्रद्वारेण । तेन ब्राह्मणमग्रतो विधाय सर्वं स्वयमनुष्ठेयमित्यर्थः । न चैवम्-

"अनुज्ञातोऽस्य नमस्कारो मन्त्रः ।"[१८]

इति नमःपदरूपमन्त्रविधानमलीकमिति वाच्यम् । मन्त्रोच्चारणं जात्यदृष्टसिध्यर्थत्वेन तद्विधानात् । मन्त्रस्य तु द्वयमेव प्रयोजनम् । अस्योच्चारणमेकार्थनियमादृष्टसिद्धम् । प्रयोगसमवेतार्थप्रकाशनं चेति तत्र नमःशब्दरूपोच्चारणे न अदृष्टसिद्धिः । ब्राह्मणपठितमन्त्रेण तु प्रयोगसमवेतार्थप्रकाशनमिति न किञ्चिदनुपपन्नमित्याहुः । सहस्रनाम-पाठादावेवाधिकारो वक्ष्यते । एवं गर्भसंस्कारकर्मस्वपि वैदिकमन्त्रस्थाने नमः शब्दप्रयोगेन शूद्राणामधिकारः ।

---

१६. या.स्मृ. ३/२६२

१७. म.स्मृ. १/९१

१८. गौ.ध.सू. २/१/६६

"शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः ।
न केनचित् समसृजत्सच्छब्दगीतं प्रजापतिः ।।"

इति यमवचनात् । अध्ययनाङ्गे तूपनयने नाधिकारः । तत्र चाग्निसाध्यस्य होमस्याग्निभावादभावेऽपि प्रधानमात्रस्यैवानुष्ठानम् । ब्राह्मणद्वारा वा सव्याऽऽवृत्करणम् । न च–

"विवाहमात्रं संस्कारं शूद्रोऽपि लभतां सदा ।"

इति ब्रह्मपुराणे विवाहमात्रं संस्कारविधानादन्येषां संस्कारकर्मणां कथं प्राप्तिरिति वाच्यम् । एतद्वाक्यस्य प्राप्तपरिग्रहरूपविवाहविधायकत्वात् इतरपरिसंख्यापरत्वे च त्रैदोष्यं मन्त्रस्यानुवादकत्वात् । उक्तसमवचनात् विरोधाच्च । मात्रशब्दात् विवाहेतरसंस्कारकर्मसु । मन्त्रनिवृत्तिपरत्वादिति केचित् । अत एव शूद्रस्य नामकरणेऽपि विशेषसामर्थ्यादिभिरप्युक्तमिति वक्ष्यते ।

"एवमेनं शमं याति जातगर्भसमुद्भवम् ।"[१९]

इति जातकर्मादेर्गर्भवासनिमित्ताशुद्धत्वापनायकत्वेन तदभावे शूद्राणां सर्वदा त्वशुद्धित्वापत्तेः संस्कारकर्मणां च कालातिक्रमेऽनादेशहोमं प्रतिनिधिब्राह्मणभोजनद्वारा दानपूर्वकं तदनुष्ठानम् । विवाहस्तु वाजसनेयीव ब्राह्मणद्वारा कर्त्तव्यः । तत्रत्यहोमसाधनभूतोऽग्निश्च पावकार्थं धारणीयः । तत्रैव वैश्वदेवानुष्ठानमिति प्राच्याः । नरसिंहपुराणे–

"अयाचितप्रदाता स्यात् कृषिं वृत्त्यर्थमाचरेत् ।
पुराणं शृणुयान्नित्यं नारसिंहं च पूजयेत् ।।" इति ।

याज्ञवल्क्यः[२०]—

"शूद्रस्य द्विजशुश्रूषा तयाऽजीवन् वणिग् भवेत् ।
शिल्पैर्वा विविधैर्जीवेद् द्विजातिहितमाचरन् ।।"

शूद्रस्य द्विजशुश्रूषा प्रधानकर्म वृत्त्यर्थं धर्मार्थं च । कर्त्तव्यं च शुश्रूषोः शूद्रस्य वृत्तेस्त्रैवर्णिकेन कल्पनीयत्वात् । तदुक्तं मनुना[२१]–

---

१९. या.स्मृ. १/१३

२०. या.स्मृ. १/१२०

२१. म.स्मृ. १०/१२५

"उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च ।
पुलकश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः ।।"

इति उच्छिष्टदानमकृतदारपरिग्रहविषयम् । कृतदारस्य पाकयज्ञाधिकारत्वात् । न च[२२]–

"न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् ।।"

इति शूद्रस्योच्छिष्टदानस्य निषिद्धत्वात् कथमेतदिति वाच्यम् । निषेधस्य सन्मार्गस्थितशूद्रविषयपरत्वात् । धर्मार्थत्वं च विष्णुपुराणे[२३]–

"द्विजशुश्रूषादिविषये सपाकयज्ञाधिकारवान् ।
निजान् जनयन्ति लोकान् शूद्रो धन्यतमः स्मृतः ।।" इति ।

तेन वृत्त्यर्थं द्विजातीन् शुश्रूषमाणोऽपि शूद्रः स्वकाले तत्तदाश्रमविहितं कर्म कुर्यादेवेत्यर्थः । द्विजातीनां मध्ये ब्राह्मणशुश्रूषाऽपि रम्यधर्मः ।

"विप्रवासे तु शूद्रस्य विशिष्टकीर्त्तिमिष्यतः ।"[२४]

इति मनुस्मरणात् । यदा पुनः द्विजशुश्रूषया जीवितुं न शक्नोति तदा वणिग्वृत्त्या जीवेत् । नानाविधैः शिल्पगीतवाद्यादिभिः वा जीवेत् । परन्तु तेषां द्विजातीनां हितमन्वहमाचरन् कुर्वन् ।

"भार्यारतः शुचिर्भृत्यः भर्त्ता श्राद्धक्रियारतः ।
नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत् ।।"[२५]

शूद्रस्य द्वे भार्ये उपपित्रा दत्ता, विधिपूर्वं दत्ता ब्राह्मणकृत–होमपूर्वपरिगृहीता च । अनूढा, चोपभोग्य पूर्वं माल्यादिना क्रीता अनुरागादिना पित्रादेरपेक्षया स्वयं गृहीता वा । तस्यामुत्पन्नस्य न शूद्रत्वम् ।

"सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः ।
तानि ज्येष्ठविवाहेषु पुत्राः सन्तानवर्त्तिनः ।।"[२६]

इति उक्तत्वात् तयोरुभयोर्भार्ययोः रतानुरक्ता न तु साधारणस्त्रीपुरुषस्त्रीषु

---

२२. म.स्मृ. ४/८०

२३. विष्णु.पु., 'द्विजशुश्रूषयैवैष पाकयज्ञाधिकारवान्' (पाठभेदः) ।

२४. म.स्मृ. १०/१२३

२५. या.स्मृ. १/१२१

२६. या.स्मृ. १/९०

वा । एतेन विवाहान्ते पुंसंस्कारेष्वनुमतिरुक्ता । शुचिः बाह्याभ्यन्तर-शौचवान् । एतेन मृत्तिकाग्रहणाचमनस्नानादयो दर्शिताः । द्विजातिवत् भृत्यानां मात्रापित्रादीनां भर्त्ता परिपोषकः भृत्याः वक्ष्यन्ते ।

श्राद्धानि नित्यनैमित्तिककाम्यवासिषु कार्यत्वाद् विहितानि । तेषामादरपूर्वकानुष्ठानवान् । अर्थात् स्वपिताऽविरुद्धासु स्नातकक्रियासु निरतः नमस्कारपदं नमःपरम् । एवकारवत् । तेन नमःपदरूपेण मन्त्रेण पूर्वोक्तान् पञ्चयज्ञान् न हापयेत् । न त्यजेत् स्वार्थं च । कर्म कुर्यादित्यर्थः । सपदि ब्राह्मयज्ञस्य स्वाध्यायाध्ययनरूपस्य सम्भवात् न शूद्रस्य पञ्चयज्ञ यथा पूर्वसिद्धिः तथा अपि । यथा अवभृथे बहिवत्त्वे तिङन्तस्य सिदादिचतुष्टयकरणेऽपि प्रयाजस्वीकारपूर्वसिद्धिः । एवं ब्रह्मयज्ञाकरणेऽपि पञ्चयज्ञस्वीकारपूर्वकमेव सिद्धिः । परे तु नमः शब्दो-च्चारणपूर्वकपुराणश्रवणेन ब्रह्मयज्ञाध्ययनजन्यस्योपकारस्य कृतत्वात्तेनैव तत्कार्यनिवृत्तिः । अत एव नृसिंहपुराणे–

"पुराणश्रवणं नित्यं वदामि तम् ।"

अर्वाञ्चस्तु इतिहासादीनां ब्रह्मयज्ञे प्रयोगतः पौराणिकपाठे तु शूद्राधिकारस्योपपादितत्वात्, पौराणिकमन्त्रेण ब्रह्मयज्ञानुष्ठानमिति । अत्र सर्वत्र वैदिकमन्त्रस्थाने एव नमःतारूपो मन्त्रो न तु पौराणिकमन्त्रस्थानेऽपि तस्य मन्त्रपदशक्तिविषयत्वाभावात् ।

"अनुज्ञातोऽस्य नमस्कारो मन्त्रः ।"[२७]

इति मुख्यमन्त्रः कार्य एव । नमः पदविधानादिषूक्तत्वाद् देवताभ्यश्चेति मन्त्रे नमस्कारपदेनोच्यते इति केचित् ।

वैश्वदेवस्तु वैवाहिकाग्नौ लौकिकाग्नौ एवेत्याचार्या इति विज्ञानेश्वरः[२८] । आचारस्तु शूद्राधिकारे– 'कुर्यादामान्नवत् सदा' इति । वैश्वदेवादावामान्नविधानात् । आमान्नेन च वैश्वदेवकरणे ब्राह्मणादीनामपि जलादौ तत्करणसमाचारात् । उक्तसर्वत्र वचनान्न एवेति । इदमुपरिष्टाद्धि वदिष्यामः ।

---

२७. गौ.धर्म. २/१/६६

२८. मिताक्षरा., पृ- ३४

गौतमः[२९]–

शूद्रश्चतुर्थवर्ण एकजातिः ।

तस्यापि सत्यमक्रोधः शौचम् ।

आचमनार्थं पाणिप्रक्षालनमेवैके ।

श्राद्धकर्म ।

भृत्यभरणम् ।

स्वदारवृत्तिः ।

परिचर्या चेतरेषाम् ।

तेभ्यो वृत्तिं लिप्सेत ।

जीर्णान्युपानच्छत्रवासः कुर्चादीनि ।

उच्छिष्टासनम् ।

शिल्पवृत्तिश्च ।

यच्चायमाश्रयेद्भर्त्तव्यस्तेन क्षीणोऽपि ।

तेन चोत्तरः ।

तदर्थोऽस्य निचयः स्यात् ।

अनुज्ञातोऽस्य नमस्कारमन्त्रः ।

पाकयज्ञैः स्वयं यजेतेत्येके ।

एकजातिरेकजन्मा । उपनयनरूपद्वितीयजन्माभावात् । इतरेषां ब्राह्मणादीनां कुर्चं तृणमयासनम् । हीनः क्षीणवृत्तिः शूद्रो ब्राह्मणादीनां भर्त्तव्यः । आर्य अदीक्षितः सन् तेन शूद्रेण भर्त्तव्यः यतोऽस्य धनसंचय आर्य्यार्थः यद्यपि शक्तेनापि कर्त्तव्यः शूद्रेण धनसंचयः ।

"शूद्रोऽपि धनमासाद्य द्विजातीनेव बाधते ।"[३०]

इति शूद्रस्य धनसञ्चयः निषिद्धः । तथापि तन्निषेधस्य द्विजातिभरणनौपयिकव्रतसञ्चयनिषेधपरत्वम् । द्विजबाधत्वेनोपपादनात् । एतेषां परिचर्या शूद्रस्य नियतवृत्तिः । अनियतकेशवेशाः स सर्वेषां वा मुक्तशिखीवर्जनम् । अनियता वृत्तिरिति । एतावत् दातव्यमिति नियमाभावरहिता

२९. गौ.ध.सू., २/१/५१–६७

३०. म.स्मृ. १०/१२९

वृत्तिरित्यर्थः । अनियताः केशवेशाश्च शूद्राणां मुक्तशिखीत्वं केनापि न कर्त्तव्यम् । नियतकेशत्वं च केषांचित् सर्वकेशधारणमिति । क्षौरपक्षे तु मासि मासि क्षौरम् ।

"शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनाम् ।"[३१]

इत्येवं प्रायश्चित्ते– 'शूद्रस्य चतुर्गुणम्' इति विशेषाभिधानात् निषेध-शास्त्रानुसारेण निषेधपरिहारेष्वधिकारः ।

"शूद्रस्य द्विजशुश्रूषा कलत्रादि पोषणम् ।"

इति देवलवचनात्[३२]–

"निषिद्धाचरणं कुर्वन् शूद्रः पतति तत्क्षणात् ।"

इति आपस्तम्बवचनाच्च ।

"पेयापेयेषु वोऽस्त्वस्य भक्ष्याभक्ष्येषु वा पुनः ।
नियमो मुनिशार्द्दूलस्तेनासौ साध्यति गुणः ।।"

इति वचनमुत्थितं शूद्रविषयं शूद्रस्य विशेषतो निषेधात् ।

"कपिलाक्षीरपानेन ब्राह्मणीगमनेन च ।
वेदाक्षरविचारेण शूद्रः पतनमृच्छति ।।"

विचारपदं सर्वत्र वेदात् निषेधपरम् । विचारपदोऽपि ज्ञानाच्च पूर्वोत्तरमीमांसयोः परिग्रहः ।

"नोच्चरेत् संस्कृतां वाणीं पुरोडाशं च न भक्षयेत् ।"

संस्कृतां वाणीं वेदमित्यर्थः । संस्कृतपौराणिकादि मन्त्रपाठस्य तस्योप-पादितत्वात् ।

"न दर्भानुद्धरेच्छूद्रो न पयः कापिलं पिवेत् ।"

दर्भ इति पदमुपलक्षणार्थम् ।

"नोच्चरेत् प्रणवं जातु न चाग्नौ जुहुयात् स्वयम् ।"

इत्यादि ।

---

३१. म.स्मृ. ५/१४०

३२. मिताक्षरा., पृ- ४०

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।

दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम् ।।[३३]

इति सर्वसाधारणदयाविहितानि दानादीनि तेष्वधिकारः प्रत्याह ।

एतं नारायणी युद्धे भूमितो यस्य विग्रहः ।

पापकोटिप्रयुक्तस्य किं तस्य कुरुते यमः ।।[३४]

इति पद्मपुराणे वैष्णवचिह्नो चक्रधारणयुक्तः । एकजातेरयं धर्मो न द्विजातेः,कथं च न इति वाक्यादेकजातेः । शूद्रस्य वैष्णवधर्मेष्वधिकारः । अष्टमीव्रतादावपि–

पूजयेयुर्द्विजा सर्वे स्त्रीशूद्राणाममन्त्रकम् ।[३५]

इति जयन्ती । तेषामपि मन्त्रः क्वचिदुक्तपूजाविधानात् । तत्र मन्त्रपदस्य प्रणवपरत्वेनाभियुक्तव्याख्यानान्न पौराणिकानधर्माय धर्मसम्भवाय इत्यादीनां नानिवृत्तिरिति ।

"न चास्य व्रतमादिशेत् ।"[३६]

इति शूद्रं प्रति व्रतोपदेशस्य मनुना प्रतिषेधात् स्वरूपतोऽस्य व्रतरूपज्ञान-प्रथमस्य व्रतानुष्ठानमिति वाच्यम् । तन्निषेधस्य सच्छूद्रविषयत्वादित्युक्त-त्वात् । न तु–

"न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति ।"[३७]

इति संस्कारधर्मोऽत्र नाधर्मप्रतिषेधार्थमिति मनुना सर्वत्राधिकार-प्रतिषेधात् । तस्य तस्य क्रियत इति चेत् तत्र निषेधस्य सच्छूद्रविषयमिति उक्तत्वात् कथमन्यथा । नामकरणप्रस्तावे मनुना[३८] एवम्–

"माङ्गल्यं ब्राह्मणस्य स्यात् ।"

इत्युपक्रम्य–

---

३३. म.स्मृ. १०/६३

३४. स्मृतिः इति आ.सा. पृ- ९४

३५. विष्णुपुराणमिति कृत्यकौ., पृ-५२

३६. म.स्मृ. ४/८०

३७. म.स्मृ. १०/१२६

३८. म.स्मृ. २/३१

"शूद्रस्य तु जुगुप्सितम् ।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुक्तम् ।"[३९]

इत्युक्तम् । किं चोपदिष्टादपि धर्मे शूद्राणामधिकारं प्रतिषिध्य धार्मिक-शूद्राणां सर्वधर्मक्रियासु प्रतिप्रसवेनैव कृतः । तथाहि[४०]–

धर्मेप्सवस्तु धर्मज्ञाः सत्तां वृत्तमनुष्ठिताः ।
मन्त्रवर्ज्यं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च ।।

ये पुनः शूद्राः धर्मं ज्ञात्वा धर्मप्राप्तिकामास्त्रैवर्णिकानामाचारं तानीप्सिता-नुष्ठिताः अनुष्ठातुमारब्धवन्तः आदि कर्मणि क्तः । तेन–

"नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत् ।"[४१]

इति वचनात् नमस्कारेऽतिरिक्तमन्त्रवर्जितार्थं यज्ञकुर्वाणं न प्रत्यवायं प्राप्नुवन्ति । "ख्यातिं च लोके लभन्ते ।"[४२]

इति कुल्लूकभट्टव्याख्या । अपि च–

"यथा यथा हि सद्वृत्तमातिष्ठत्यनसूयकः ।
तथा तथेमं चामुं च लोकं प्राप्नोत्यनिन्दितः ।।"[४३]

इति परगुणनिन्दकः शूद्रे यथा यथा द्विजात्याचारमनिषिद्धमनुतिष्ठति, तथा तथा तेन प्रकारेण इहलोकोत्कर्षममुं च स्वर्गादिलोकं प्राप्नोतीति अनुवाक्यस्यार्थः । तेन धर्मेच्छूनां शूद्राणां संस्कारकर्मसु तानि सिद्धेषु स्नातकर्मसु ख्यातकर्मसु च नानाश्रुतिपुराणवशात् सिद्धोऽधिकारः । एवमौर्ध्वदैहिकादिकर्मसु अपि–

"शूद्रस्य दशमपिण्डः पूर्णे मासे विधीयते ।"

इति स्मरणात् । न तु–

"ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः ।
निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः ।।"[४४]

---

३९. म.स्मृ. २/३२

४०. म.स्मृ. १०/१२७

४१. या.स्मृ. १/१२१

४२. मन्वर्थमुक्तावलिः, म.स्मृ. १०/१२७

४३. म.स्मृ. १०/१२८

इति त्रैवर्णिकानामेवं श्मशानान्तं कर्मविधानं न शूद्राणामपि । "न तेषां वै मन्त्रतः क्रिया" इति त्रैवर्णिकानां मन्त्रवत्तया सर्वकर्मविधानेऽर्थात् शूद्राणाममन्त्रतया सर्वकर्मविधानात् । एवं नोत्सृज्य इति सामान्यतो यतशब्दनिर्देशात् । तत् शूद्रे– 'शूद्राणां मन्त्रवर्ज्यमेव' इत्युक्तत्वाच्च, 'नीलेनान्त्यजन्मनः' इति शूद्रकर्त्तृकोत्सर्गे नीलवृषभविधानात् । एवं ग्रहयज्ञप्रकरणे[४५]–

यश्च यस्य यदा दुःस्थः स तं यत्नेन पूजयेत् ।
ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ ।।

इति यज्ञवृषभोत्सर्गकर्मणा बहुतरवैदिकमन्त्रसाध्यत्वाद् ब्राह्मणद्वारा तदनुष्ठानम् । प्रधानोत्सर्गे स्वस्य कर्त्तृत्वम् । तत्रापि– 'इमं युवानम्' इत्यध्युत्सर्गमन्त्रस्थाने नमःपदप्रयोगः । ब्राह्मणेन एतस्मिन् मन्त्रे पठ्यमाने यजमानेनोत्सर्गमिति केचित् । होमादौ च तत्र कर्त्तृत्वमिति मेधातिथिः । दानादौ च पौराणिकप्रार्थनामन्त्रः शूद्रेण पठनीयः । तेषां पुनः कर्मणां द्विजातिमात्रकर्त्तृत्वेन विधानम् । तत्र पुनः चैषामधिकारः । यथा संध्यावन्दनादावपि "स्त्रीशूद्रयोः विवाहसंस्कारोऽतः प्रभृति धर्माधर्मयोः प्रवृत्तिः" इति वचनाद् विवाहानन्तरमदृष्टार्थकर्मस्वधिकार इति अधिकारनिरूपणम् ।।

नित्यनैमित्तिककर्मणामनुष्ठानप्रकारः

अथ कृतोद्वाहस्य शूद्रस्य उत्थानात् शयनपर्यन्तं यावन्ति नित्यानि नैमित्तिकानि कर्माणि तेषामनुष्ठानप्रकारः कथ्यते ।

तत्र ब्राह्मे मुहूर्त्ते उत्थानम् । ब्राह्ममुहूर्त्तं तु रात्रेः चतुर्थयामः । अलसानां तु रात्र्यन्तिमयामस्य तृतीयमुहूर्त्तः 'नमोऽस्तु प्रियदत्तायै'[४६] इति भूम्याक्रमणम् । मुखनेत्रप्रक्षालनम् । लालादि प्रोञ्छनम् । वस्त्रान्तरपरिधानम् । आसनान्तरेण उपवेशनम् । पादप्रक्षालनादि

४४. या.स्मृ. १/१०

४५. या.स्मृ. १/३०७

४६. आ.सा., पृ- २२

शुद्धिविधानम् । सर्वकर्माङ्गतया नारायणनमस्कारः ।

"शयनात् उत्थितो यस्तु ।"[४७]

इति वचनात् मधुसूदनकीर्त्तनम् ।

"यदुत्साहादिकं कर्म यत्त्वया प्रेरितो हरे ।
करिष्यामीति वा ज्ञेयमिति विज्ञापनं मम ।।
साधु वाऽसाधु वा कर्म यद्यदाचरितं मया ।
तत्सर्वं भगवान् कृष्णो गृहाणाराधनं परम् ।।"

संसारयात्रामनुवर्त्तमानं
तदाज्ञया श्रीनृहरेऽन्तरात्मन् ।
स्पर्द्धातिरस्कारकलिप्रमाद-
भयानि मां नाभिनन्दन्तु भूमन् ।।[४८]

जानामि धर्मं न च मे प्रवृत्ति-
र्जानाम्यधर्मं न च मे निवृत्तिः ।
केनापि देवेन हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करिष्ये ।।[४९]

इति कृतं करिष्यामीति कर्मनिवेदनम् । एवम्-

"केशव पुण्डरीकाक्षो माधवो मधुसूदन ।
चत्वारीमानि नामानि प्रातरुत्थाय यः पठेत् ।।"

इति वचनात् एतत् नामचतुष्टयं कीर्त्तयेत् । यस्य श्रीनारायणमूर्त्तौ विश्वासस्तन्मूर्त्तिध्यानम्, ध्यानाशक्तौ अरुणोदयपर्यन्तं विष्णुनाम-कीर्त्तनम् । अन्येषां पुण्यश्लोकानां कीर्त्तनम्-

अग्नित्रयं त्रीणि च पुष्कराणि
रामत्रयं त्रीणि पदानि विष्णोः ।
हरं त्रिनेत्रं त्रिपथां च गङ्गां
स्मरामि दुःस्वप्नविनाशनाय ।।

---

४७. आ.सा., पृ- २३

४८. आ.सा., पृ- २३

४९. आ.सा. पृ. २४

इति दुःस्वप्नहरणानां स्मरणम् ।

"श्रोत्रियं सुभगां गां च अग्निमग्निचितं तथा ।
प्रातरुत्थाय यो पश्येदापद्भ्यः स प्रमुच्यते ।।"[५०]

एवम्-

"कल्यमुत्थाय यो मर्त्यः संस्पृशेद् गां घृतं दधि ।
सर्षपांश्च प्रियंगुं च कल्मषात् स प्रमुच्यते ।।"[५१]

इति वचनादेषां दर्शनं स्पर्शनं च । पापिष्ठदुर्भगानग्निचिच्छिन्ननासिकानां च दर्शनपरिहारः । ततः-

"प्रातः कल्यं समुत्थाय कुर्यान्मैत्रं नराधिप ।
नैरुत्यमिषुविक्षेपमतीत्याभ्यधिकं भुवः ।।"[५२]

इति वचनात् शयनगृहात् स्नानगृहान्नैरुतके दिक्षु प्रक्षेपमात्रं गत्वा पुरीषोत्सर्गं कुर्यात् । तत्र प्रकारं च-

"न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ।
न फालकृष्टे न जले न चित्यां न च पर्वते ।।
न जीर्णदेवतायतने न वल्मीके कदाचन ।
न ससत्वेषु गर्त्तेषु न गच्छन्नापि च स्थितः ।।"

इति वचनात्[५३]उपविष्टः स्ववस्त्रादिना च घ्राणमुखं वेष्टयित्वा दिवासंध्ययो-रुदङ्मुखः । रात्रौ च दक्षिणामुख उभयोपरिस्थितौ च यथासुखं मुखोऽयज्ञापक्वेष्टकादिना भूमिमाच्छाद्य मौनी मूत्रपुरीषयोः उत्सृजेत् ।

"अयज्ञीयैः तृणैः काष्ठैः पत्रैः लोष्टैस्तथाऽपि वा ।
आस्तीर्य वसुधां चैव वस्त्रप्रावृतमस्तकः ।।"[५४]

इति विष्णुपुराणाच्च । अत्र वर्जनीयाः प्रदेशाः ।

---

५०. कात्यायन इति आ.सा. पृ- २९

५१. कात्यायन इति आ.सा. पृ- २९

५२. आ.सा. पृ- २९

५३. म.स्मृ. ४/४५-४७

५४. विष्णु.पु. ३/११-१४

वापीकूपनदीगोष्ठचैत्याम्भः पथिभस्मसु ।
अग्नौ काम्ये श्मशाने च विण्मूत्रं न समाचरेत् ।।[५५]

चैत्यो प्रसिद्धवृक्षः । अग्निश्चितिस्थानम्, कामं कमनीयप्रदेशः । एवम्-

तुषाङ्गारकपालानि देवतायतनानि च ।
उपरुद्धो न सेवेत च्छायां दृश्यं चतुष्पथम् ।।[५६] इति ।
उदकं पर्णिनं च वर्जयेत् ।
वर्जयेत् वृक्षमूलानि चैत्यखम्भविलानि च ।
न चत्वरोपद्वारयोर्मूत्रपुरीषे कुर्यात् ।[५७]
न पश्येदात्मनः शकृत् ।[५८]
प्रत्यादित्यं न मेहेत ।
दृष्ट्वा सूर्यं निरीक्षेत गामग्निं ब्राह्मणं तथा ।[५९]

इति पुरीषोत्सर्गकाले सूर्यदर्शनम् । शौचाद्यनन्तरं गवादिदर्शनं प्रायश्चित्त-तया त्यक्तव्यमित्यर्थः ।

अथ शौचम्

गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः ।[६०]

इति याज्ञवल्क्यवचनात् शिश्नं गृहीत्वा । अथ-

[६१]गुदं काष्ठे प्रमृजीत मृष्ट्वा लोष्टेन वेति वचनात् ।

तथा कुर्यात् ।

'अभ्युद्धृतैः जलैः' इति वचनात् ।

दक्षहस्तधृतकमण्डलुगृहीतैर्जलैरुक्तलक्षणाभिश्च मृत्तिकाभिः शौचं कुर्यात् ।

---

५५. देवल इति आ.सा. पृ- ३२
५६. यम इति आ.सा., पृ- ३२
५७. हारीत इति आ.सा. पृ- ३२
५८. यम इति आ.सा., पृ- ३२
५९. यम इति आ.सा., पृ- ३३
६०. या.स्मृ. १/१७
६१. हारीत इति आ.सा., पृ- ३४

एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ।
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता ।।[६२]

इति वचनात् एवंरूपेण शौचं कार्यम् । मृत्तिका च अङ्गुलाष्टकं गृहीत्वा ग्राह्या ।

अष्टाङ्गुलानि खानित्वा उद्धरेन् मृत्तिकां ततः ।[६३]

इति वचनात् एतद्वाक्यस्य मूलत्वेऽपास्तकरणे विरोधाभावात् ।

मृत्तिकामाहरन् विप्रः कूलात् ससिकतात्तथा ।[६४]
नाखूत्कृष्टान्न वल्मीकान् पांशुलां न च कर्दमाम् ।
न मार्गान्नोषरां चैव शौचशिष्टात् परस्य च ।।[६५]
अन्तःप्राणावपन्नां च हलोत्खातां च पार्थिव ।
शुचौ देशे च संग्राह्य शर्कराऽश्मादि वर्जिता ।।[६६]

इति विष्णुपुराणे ।

वल्मीकमूषिकोत्खातां मृदुमन्तःजलात्तथा ।
शौचावशिष्टं मार्गाच्च न दद्याल्लेपसम्भवात् ।।

इति वचनानुसारेण ग्राह्या ह्येता, परन्तु वालुकामय्यादि देशे मृत्तिकाऽसंभवे शौचविलोपापत्तौ गुणलोपेन मुख्यस्य न्यायेन ।

यस्मिन् देशे च यत्तोयं या भूमिर्या च मृत्तिका ।[६७]

इति विरोधाच्च । यथा कथञ्चित् मृत्तिकामात्रं ग्राह्यम् । इति ।

मृत्तिकां च गुदौ चेद् द्विप्रसृतिमात्रां द्वितीये च तद्वत् द्विमात्राम् ।

हारीतः–

तत्पृष्ठे षट्, हस्तयोः सप्त मृज्जलेन ।
वामहस्तनखशोधनार्थं वा त्रयं, पादद्वयोश्च वा त्रयम् ।। इति ।

---

६२. म.स्मृ. ५/१३६
६३. आ.सा., पृ- ३५
६४. ब्राह्मे इति आ.सा., पृ- ३४
६५. विष्णुपुराणमिति आ.सा., पृ- ३४
६६. शातातप इति आ.सा., पृ- ३५
६७. मनु इति आ.सा., पृ- ३५

अत्र गन्धानुवृत्तौ उक्तसंख्या आवर्त्तनीया। उक्तसंख्यामध्ये च गन्धलेप-निवृत्तिसम्भवेऽपि संख्यापूर्तिः स्वयं करणीया। नाधिकं तु न कर्त्तव्यम्।

'शौचशुद्धिमभीप्सता'।[६८]

इति वचनात्। अत्र च–

यदुक्तं च दिवा शौचमर्धरात्रौ विधीयते।
आतुरस्य तदर्द्धं स्यात् तदर्द्धं तु पथि स्मृतम्॥[६९] इति।

मूत्रोत्सर्गे तु–

एका लिङ्गे वामहस्ते वा त्रयं हस्तयो-
र्वारिद्वयं पादयोश्च त्रयं त्रयम्।

शुक्रोत्सर्गे तु द्विगुणमक्षतादेव। मार्गगमने तु पादयोर्वारत्रयम्। 'मृजिनैव क्षालनम्' इति संक्षेपतः। कमण्डलोरम्लाने शोधनं तथा च मनः निबद्धकक्षच्युतस्य प्राङ्मुखस्योदङ्मुखस्य वाऽवस्थानम्। जानुनोर्मध्ये हस्तप्रसारणम्।

अन्तर्जानु शुचौ देशे उपविष्टः उदङ्मुखः।[७०]

इति वचनात्। ततश्च–

प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः॥[७१]

इति वचनात् पादप्रक्षालनम्। ततश्च–

अद्भिस्तु प्रकृतिस्थाभिः हीनाभिः फेनबुद्बुदैः।[७२]

इत्याद्युक्तलक्षणस्य ब्राह्मणतीर्थस्य कमण्डलोराचमनम्। दक्षकरकमण्डलुस्थितसोमतीर्थेन जलं यथा तालुपर्यन्तं गच्छति तथा सकृत् पिबेत्।

शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः।[७३]

---

६८. दक्ष इति आ.सा., पृ- ३६

६९. दक्ष इति आ.सा., पृ- ३६

७०. या.स्मृ. १/१८

७१. देवल इति आ.सा., पृ- ३९

७२. या.स्मृ., १/२०

७३. या.स्मृ. १/२१

इत्यत्र अन्तःशब्दस्य तालुपरतया विज्ञानेश्वरव्याख्यानात्[७४] । आङ्पूर्वस्य च मते रक्षणार्थत्वात् । अन्तःशब्दस्य मुखादाववयवान्तःपरत्वे मुखान्तरावयवाः ग्राह्याः । अत एव मनुः[७५]–

त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम् ।
शरीरं शौचमिच्छन् हि स्त्री शूद्रस्तु सकृत् सकृत् ।।

इति स्त्रीशूद्रयोः सकृदाचमनमाह । न तु जलस्पर्शनमात्रम् । यत्तु–

स्त्री शूद्रो वा विशुद्धः स्यादाचम्य च करोष्ठयोः ।

यद्यप्याचमनार्थे । स एतदपि पादप्रक्षालनमेवावश्यकत्वं परं न तु तावन्मात्रेण चायमननुष्ठानसिद्ध्यर्थम् । मनुयाज्ञवल्क्यादिविरोधात् । तेन जलपानं शूद्रस्यावश्यकत्वम् ।

ततश्चाङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम् ।[७६]

ततः सव्यहस्तेन जलं गृहीत्वा पादौ शिश्नश्च क्रमेण च प्रोक्ष्य संहतेन मध्यमाङ्गुलित्रयेण संवृतं मुखं स्पृशेत् । ततश्चाङ्गुष्ठाभ्यां दक्षिणक्रमेण नासिकयोः । अनामिकाऽङ्गुष्ठाभ्यां नेत्रयोः । श्रोत्रयोश्च कनिष्ठाभ्यां नाभिं स्पृष्ट्वा जलं स्पृशेत् । ततः करतलेन हृदयं स्पृष्ट्वा बाहू चाग्रेण संस्पृशेदिति, इन्द्रियस्पर्शनम् । इदमाचमनं भोजनावसानादौ द्विः कर्त्तव्यम् ।

'भोक्ष्यमाण द्विराचमेत् ।'

इति वचनात्, ब्राह्मणादीनां त्रिरभ्यस्य त्रिभक्षणस्याचमनस्य द्वित्वविधाने यथा आवृत्तिः तद्वदेव शूद्रस्यापि सकृज्जलपानरूपस्य वृत्तेर्युक्तत्वात्। तत्र सकृत् प्रथमाचमनमिन्द्रियस्पर्शनान्तं कृत्वा पुनः द्वितीयाचमनमिन्द्रियस्पर्शनान्तं कर्त्तव्यम् । आचमनभावनया एव द्वित्वविधानात्।भावनायाश्च इतिकर्त्तव्यताविषयत्वादित्युपपादितमस्मात् सूत्रेण मीमांसायाम्, इदमाचमनमासनादुत्थाय कर्त्तव्यं, भोजनानन्तरं तु आसने स्थितैव ।

---

७४. मिताक्षरा., पृ- ८, (या.स्मृ. १.२१)

७५. म.स्मृ. ५/१३९

७६. दक्ष इति आ.सा., पृ- ४१

भुक्तवानासनस्थोऽत्याचामेन्नात्र कदाचन ।

इति वचनात्, आचमनमात्रं तु–

कांस्येनायसपात्रेण त्रपुंसीसकपित्तलैः ।

आचान्तः शतकृत्वोऽपि विशुद्धं नैव गच्छति ।।[७७]

इति वचनात् कांस्यादिव्यतिरिक्तं कार्यम् । इदं तु शूद्राचमनविषयम् । कर्मांगाचमनं पित्तलपात्रादिना भवेदिति लक्ष्मीधरः । आचमननिमित्तानि मूत्रपुरीषोत्सर्गे कालातिरिक्तकालीनशुक्रोत्सर्गात् शिष्टस्पर्शन-दन्तधावन-क्षुत्-निद्राभङ्ग-अनिष्टभोजनं शूद्रान्तरस्पर्शनभोजनं चण्डाल-शवगर्दभादिस्पर्शनानि अन्यान्यपि श्मशानकर्मण्यभ्यङ्गादीनि स्मृत्यन्तरेभ्यः ज्ञेयानि ।

आचमनं तु शुद्ध्यर्थं नैमित्तिकं कर्माङ्गं चेति त्रिविधम् । तत्र विण्मूत्रोत्सर्गाद्यशुध्यर्थम् । वस्त्रान्तरपरिधानादिषु नैमित्तिकम् । पूजा वै कर्माङ्गमिति संक्षेपः । जीवं च पुरीषोत्सर्गकरणमरुणोदयकाले आवश्यकम् ।

'कुर्यान्मैत्रं नराधिप ।'[७८]

इति विष्णुपुराणे नियमेन विधानात्, तेनावेगादिनाऽर्थकरणे न दोषः । यदा पुनरन्यदा करणं तदा वस्त्रान्तरवृत्तिर्वा कौपीनवारिसंयोगेन वस्त्रस्य शुद्धत्वात् ।

अपवित्रकृते ते हि कौपीनशौचवारिणे ।

इति कौपीनजलस्य शुद्धत्वाभिधानात् । कौपीनयोगात् कौपीन गुह्यदेश इत्यभियुक्तव्याख्या । कौपीनं गुह्यवाससोरिति [७९]कोषेऽपि ।

अथ दन्तधावनम्

मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः ।[८०]

---

७७. स्मृतिवचनमिति आ.सा., पृ- ४२

७८. आ.सा., पृ- २९

७९. अ.को., ३/३/१२१

८०. वृद्धशातातप इति कृत्यकल्प., पृ-६, नरसिंहपुराणमिति आ.सा., पृ- ५५

इति वचनात् प्रयतनिमित्तं तत्कार्यम् । प्रयतो च कर्माधिकारनिमित्तं संस्कारविशेषः । स च दन्तधावनप्रतिषेधे द्वादशसंख्यागण्डुषसाध्यः ।

अलाभे दन्तकाष्ठानां प्रतिषिद्धदिने तथा ।
अपां द्वादशगण्डुषैर्मुखशुद्धिर्विधीयते ।।[८१]

इति वचनात् ।

उत्थाय नेत्रौ प्रक्षाल्य शुचिर्भूत्वा समीहितः ।
परिजप्य च मन्त्रेण भक्षयेद् दन्तधावनम् ।।[८२]

परिजप्यशब्देनाभिमन्त्रणमुच्यते । तेन दन्तधावनकाष्ठं मन्त्रेणामन्त्र्य दन्तधावनं कुर्यादित्यर्थः । केन प्रकारेण इत्यपेक्षायामाह–

आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्मविद्यां च मेधां च त्वन्नो देहि वनस्पते ।।[८३]

इति च्छान्दोग्यपरिशिष्टमन्त्र उक्तः । 'शूद्रा वाजसनेयिनाम्' इत्यापस्तम्ब-स्मरणाद् वाजसनेयिनामाम्नातत्वात्, स त्वाह–

'सोमराजाय मा गमत्, स मे मुखं प्रमार्ज्यते ।
यशसा च बलेन च ।'

इति गृह्यपठितो[८४] दन्तधावनमन्त्रोऽपि प्राप्नोति । तत्र प्रथमतः कात्यायनीयादिभिः मन्त्रेण मन्त्रशीर्षत्वात् द्वितीयस्य सौत्रत्वात् सौत्राणां च प्रायशः शाखान्तरीयत्वात्, शूद्रस्य च तत्रानधिकारात् उभयमपि नमःपदेन कर्त्तृत्वम् । अत एव 'मन्त्रवर्जं न दुष्यति' इत्यत्र नमः पदातिरिक्तमन्त्रवर्जमिति व्याख्यातम् ।

केचित्तु सौत्रमन्त्रे वैदिकमन्त्रत्वसम्भावनयाऽधिकाराभावेऽपि स्मार्त्तस्याभिमन्त्रणे मन्त्रस्य वैदिकत्वाभावात् तत्र च पौराणिकमन्त्र

---

८१. कृत्यकल्प, पृ- १३, व्यास इति आ.सा., पृ- ६०

८२. छान्दोग्यपरिशिष्टे कात्यायनः, १/७/१३९
कृत्यकल्प. नियत., पृ- १०, आ.सा., पृ- ५६

८३. छान्दोग्यपरिशिष्टे कात्यायनः, १/७/४०
कृत्यकल्प. नियत., पृ- ११, आ.सा., पृ- ५६

८४. पार.गृ.सू. २/६/१२

इवाधिकारो दुर्निवारः । पुराणेष्वधिकार इत्यत्र, पुराणशब्दस्य वैदिकातिरिक्तनिखिलविद्यास्थानविषयत्वात् ।

न हि वेदेष्वधिकारः क्वचिच्छूद्रस्य विद्यते ।[८५]

इत्युपक्रमात् तेनाभिमन्त्रणे मन्त्रः पठनीयः । न चासौ दन्तधावनमन्त्रः । धावनं तु नमःपदेनैव कर्त्तव्यमिति वर्णयन्ति । ब्राह्मणेन मन्त्रेण पठ्यमानेऽभिमन्त्रणं दन्तधावनं कार्यमिति गौडाः ।

मन्त्रपाठपक्षे प्रतिषिद्धदिनादौ दन्तधावनकार्यप्रत्याम्नातेन द्वादशसंख्या जलगण्डुषसमुदाये वनस्पतये इत्यत्र जलगण्डुषेति पदोहेन प्रयोगः । तन्मन्त्रवार्तिकायुरादिफलकामनाऽभाषेषु अयं मन्त्रः पठनीयः । मन्त्रस्य नित्यवदाम्नातत्वात् ।

कुहूषष्ठ्योर्नवम्यां च पक्षादौ दन्तधावनम् ।
पर्णैरन्यत्र काष्ठेषु जिह्वोल्लेखः सदैव हि ।।[८६]

इति वचनादमावास्यादौ पत्रेण दन्तधावनेऽपि वनस्पता इत्यधिकारेण मन्त्रः प्रयोज्यः । काष्ठवत् पत्रस्यापि वनस्पतिप्रभवत्वात् ।

खदिरश्च कदम्बश्च करञ्जश्च वटस्तथा ।
तिन्तिली वेणुपृष्ठं च आम्रनिम्बौ तथैव च ।।[८७]
अपामार्गश्च बिल्वश्च अर्कश्चोदुम्बरस्तथा ।
सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ।
कटुतिक्तकषायाश्च धनारोग्यसुखप्रदाः ।।[८८]
अष्टाङ्गुलेन मानेन तत्प्रमाणमिहोच्यते ।
प्रादेशमात्रमथवा तेन दन्तान् विशोधयेत् ।।

---

८५. मत्स्य.पु. इति श्रा.प्र., पृ- १२७

८६. स्मृत्यन्तरे इति आ.सा., पृ- ६०

८७. नरसिंहपुराणे ५८/४७-४८ इति आ.सा., पृ- ५५
कृत्यकल्प. नियत., पृ- १२

८८. नारद इति आ.सा., पृ- ५५
नरसिंहपुराणे ५८/४९,५० इति कृत्यकल्प. नियत., पृ- १२

इति दन्तकाष्ठे अष्टाङ्गुलित्व-द्वादशाङ्गुलित्वयोः विकल्पः । उपोथिताग्रं न स्थूलं न शुष्कं कीटवर्जनम् । उपोथिताग्रं चूर्णिताग्रम् ।

'न पलाशं दन्तधावनं स्यात् ।
न श्लेष्मातककरिष्टबिभीतकधनधान्यवर्जितम् ।
न कोविदारशमीपीलुपिप्पलेङ्गदगुद्यालुः ।
न बन्धुनिर्गुण्डीशिग्रुतिल्यतिन्दुकः ।
न पारिभद्राम्लिकामोचकशाल्मलीषणवर्जम् ।
न मधुरं नार्द्रम् । नोद्र्ध्वं शुष्कं न शुषिरं न पूतिगन्धम् ।
न पिच्छिलं दन्तकाष्ठं भक्षयेत् ।'[८९]

अत्र केषांचिद् विहितानां प्रतिषेधो विकल्पोऽर्थः ।

एनं च कुर्याद्दन्तकाष्ठं तु तैले शिरसि स्थितः ।

इति वचनाद् गृहीततैलस्य दन्तधावननिषेधः । तन्न ।

मध्याह्नस्नानकाले यो भक्षयेद् दन्तधावनम् ।
निराशास्तस्य गच्छन्ति पितृभिः सह देवताः ।।

इति मत्स्यपुराणात् मध्याह्नस्नानकालेऽपि दन्तधावननिषेधः । एवम्-

प्रतिपद्दर्शषष्ठीषु नवम्येकादशीषु च ।
दन्तानां काष्ठसंयोगे दहत्यासप्तमं कुलम् ।।[९०]
श्राद्धे जन्मदिने चैव विवाहे मुखदूषिते ।
व्रते चैवोपवासे च वर्जयेद् दन्तधावनम् ।।[९१]
इष्टकालोष्ट्रपाषाणैर्नखैरङ्गुलिपर्वभिः ।
मुक्त्वा चानामिकाङ्गुष्ठौ वर्जयेद् दन्तधावनम् ।।[९२]

इति प्रसिद्धदिनेषु संस्कारार्थस्य निषिद्धत्वेऽपि पत्रैः तिलगण्डुषैर्वा मुखशुद्धिविधाने सुखार्थे दन्तधावनेऽपि न विरोधः । तत्र 'भक्षयेद

---

८९. विष्णुधर्मसूत्रे., ६१/१-११, आ.सा., पृ- ५७,
कृत्यकल्प. नियत. पृ- ८

९०. नरसिंहपुराणे इति आ.सा., पृ- ५८

९१. स्मृत्यन्तरे इति आ.सा., पृ- ५९

९२. स्मृत्यन्तरे इति आ.सा., पृ- ५७

दन्तधावनम्'[१३] इति अभक्ष्यपदोपादानं तद्धर्मीनामाद्यन्ताचमनादीनां प्राप्त्यर्थम् ।

प्रक्षाल्य हस्तौ पादौ च मुखं चैव समाहितः ।
दक्षिणं बाहुमुद्धृत्य दन्तान् काष्ठेन शोधयेत् ।।[१४]

अथ प्रयोगः—

'प्राङ्मुखस्योदङ्मुखस्य'[१५] वा उपवेशनम् । सर्वपादप्रक्षालने दक्षिणपादस्य प्रथमं प्रक्षालनम् । 'शूद्राः वाजसनेयिनाम्' इति स्मरणात् द्विराचमनम् । दक्षिणहस्तस्य जानुमध्ये करणं मौनम् । नम इति मन्त्रेण वा दन्तकाष्ठाभिमन्त्रणम् । नम इति मन्त्रेण दन्तघर्षणम् । काष्ठान्तरेण जिह्वोल्लेखः । तोयगण्डूषैरनेकैः मुखप्रक्षालनम् । द्विराचमनम् ।

दन्तकाष्ठपातने विशेषः—

प्रक्षाल्य च शुचौ देशे दन्तधावनमुत्सृजेत् ।
पतितोऽभिमुखे सम्यक् भोज्यमाप्नोत्यभीप्सितम् ।।[१६]
ऐश्वर्यभङ्गमाप्नोति यः क्षिपेदशुचौ भुवि ।
ऊद्ध्र्वे निपतिते सिद्धिस्तथा चाभिमुखे स्थिते ।
अतोऽन्यथा च पतने आनीय पुनरुत्सृजेत् ।।[१७]

इति दन्तधावनम् ।

शौचान्तस्तु ततः कुर्यात् पुमान् केशप्रसाधनम् ।
आदर्शाञ्जनमाङ्गल्यदूर्वाद्यालम्भनानि च ।।[१८]

इति विष्णुवचनाद् विकङ्कणादिना केशप्रसाधनसंस्कारः । नीविबन्धनम्. अञ्जनग्रहणम् इति ।

---

१३. कात्यायन. १/७/१३९, आ.सा., पृ- ५६

१४. महाभारते इति आ.सा., पृ- ५८, कृत्यकल्प. नियत., पृ- १४

१५. विष्णुः., ६१/१३, कृत्यकल्प.नियत. पृ- ९

१६. विष्णु इति आ.सा., पृ- ५८

१७. भारते इति आ.सा., पृ- ५८

१८. विष्णुपुराणे इति आ.सा., पृ- ६०

अथ स्नानम्

तच्च युगपत् सर्वाङ्गांशजलसंयोगः । स च मज्जनसाध्यः । केचित्तु सर्वाङ्गीणजलसंयोगमात्रं तत्क्रमिकजलसंयोगेऽपि तेनावगाहनोद्धृतोदकस्नानयोरुभयोः स्नानपदं मुख्यमिति वदन्ति । जप्त्वाऽवगाह्य च ।

"अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ।
स्रवत्येष दिवारात्रौ प्रातःस्नानं विशोधनम् ।।"[९९]

इति दक्षमूलवचनात् । अदृष्टार्थत्वं च ।

"याम्यं हि यातनादुःखं प्रातःस्नायी न पश्यति ।
नित्यस्नानेन पूयन्ते येऽपि पापकृतो जनाः ।।"[१००]

कर्माणि च ।

"स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि ।
पवित्राणां तथा जप्ये दाने च विधिचोदितः ।।"[१०१]
"सर्वमर्हति पूतात्मा प्रातःस्नायी जपादिकम् ।।"[१०२]

इत्यादिवाक्यात् । तच्च प्रातःस्नानमरुणोदयकाले कार्यम् ।

"प्रातःस्नानारुणकिरणग्रस्तां प्राचीमवलोक्य स्नायात् ।।"[१०३]

इति वचनात् । केचित्तु—

"सूर्योदयं विना नैव स्नानदानादिकं क्रिया ।"

इति स्नानपदस्य काम्यस्नानपरत्वे मानाभावात् । स्त्रीशूद्रकर्त्तृकनित्यस्नानपरत्वं च मन्यमानानां शूद्राणां सूर्योदयात् प्राक् स्नानं नास्तीति मन्यते । तन्नातीवयुक्तम् । त्रैवर्णिकेषु शुश्रूषानुरोधेन त्रैवर्णिकस्नानात् पूर्वमेव तत्स्नानस्योचिततत्वात् । अत्यन्तमलिनकायमित्यादिना तस्य

---

९९. दक्ष., २/८, आ.सा., पृ- ६२, कृत्यकल्प. नियत. पृ- १८
१००. विष्णु., ६४/४२, कृत्यकल्प.नियत. पृ- २०, आ.सा., पृ- ६३
१०१. विष्णु., ६४/४०, कृत्यकल्प.नियत., पृ- १९, आ.सा., पृ- ६३
१०२. दक्षः, २/१०, आ.सा., पृ- ६३, कृत्यकल्प.नियत., पृ- १९
१०३. विष्णु. ६४/९, कृत्यकल्प.नियत. पृ- २२

दृष्टार्थत्वस्योक्तत्वाच्च । किं च प्रकृतौ प्रातःस्नाने अधिकाराभावे तन्निष्कृतिमाघस्नानादावप्यनधिकारप्रसङ्गः । न च तदिष्टम् । माघस्नाने शूद्राणां मन्त्रवर्जितमिति विशेषाभिधानात् । इति । तच्च स्नानमकृत्रिमादेव नद्यादावेव कर्त्तव्यम् ।

"स्नानं चाकृत्रिमे जले ।"[१०४]

इति वचनात्, सर्वत्राकृत्रिमाद्यसम्भवे कृत्रिमे । तत्रापि परकीयतडागादौ स्नानकरणे पञ्चपिण्डोद्धरणम् । अन्यथा तज्जलाशयदुष्कृतांशभागित्वम् । क्रीते स्वकृते, पित्रादिकृते वा तडागादौ स्नानेन पञ्चपिण्डोद्धरणम् । तथा चास्मत्पितृचरणानां संग्रहश्लोकः –

"पित्रादि खाते स्वकृते च खाते
स्नानेन पिण्डोद्धरणे न दोषः ।"

अकृत्रिमाम्भसु इत्यत्र सर्वस्नानाङ्गतोत्सर्गविधिं विना चेति अनेन द्वयम् ।

"यव्यद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः ।।"[१०५]

श्रावणभाद्रपदातिरिक्तमासेषु नदीस्नानं प्रत्यक्षसमुद्रगमनादिपरम् । उन्नतासु गङ्गादिषु तस्मिन् मासद्वयेऽपि स्नानम् । कूपस्नानकरणे घटोद्धरणम् । स्वकीये तु स्नानप्रकारश्च ।

"नार्द्रमेकं च वसनं परिदध्यात् कथञ्चन ।"[१०६]

इति वचनाद् यज्ञोपवीतवदुत्तरीयवस्त्रं गृह्णीयात् ।

"ब्रह्मक्षत्रविशां चैव मन्त्रवत् स्नानमिष्यते ।
तूष्णीमेव तु शूद्राणां सनमस्कारकं स्मृतम् ।।[१०७]

इति वचनात् सर्वत्र वैदिकमन्त्रस्थाने नमःपदरूपो मन्त्रः । नम इति मृत्तिकामादाय त्रिः पादौ प्रक्षाल्य उदकमवगाहेत । 'वारुणायापां पतये नमः' इति जलाञ्जलिं क्षिपेत् । ततश्च–

---

१०४. दक्ष. २/४४

१०५. छान्दोग्यपरिशिष्टे, १/७/१४०

१०६. जाबाल इति आ.सा., पृ- ७१

१०७. योगीयाज्ञवल्क्य इति कृत्यकल्प.नियत. पृ- ८१

"विष्णोः पादप्रसूताऽसि वैष्णवी विष्णुपूजिता ।
पाहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिकम् ।।"[१०८]
"तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत् ।
दिवि भुव्यन्तरिक्षे च तानि ते सन्ति जाह्नवी ।।"[१०९]
"नन्दिनीत्येव ते नाम देवेषु नलिनीति च ।
नन्दा पृथ्वी च सुभगा विश्वकायासि वासिता ।।"[११०]
"विद्याधरी सुप्रसन्ना तथा लोकप्रसादिनी ।
क्षेमा च जाह्नवी चैव शान्ता शान्तिप्रदायिनी ।।
भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी ।
विष्णुपादाग्रसम्भूता गङ्गा त्रिपथगामिनी ।।"[१११]
"एतानि पुण्यनामानि स्नानकाले प्रकीर्त्तयेत् ।
भवेत् सन्निहिता तत्र गङ्गा त्रिपथगामिनी ।।"[११२]

इति पद्मपुराणीयं पठेत् । नारायणाय नम इति जपित्वा जलाञ्जलिं शिरसि क्षिपेत् ।

"अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ।।"[११३]

इति मृत्तिकामादाय–

"उद्धृताऽसि वराहेण विष्णुना शतबाहुना ।
मृत्तिके त्वां प्रगृह्णामि प्रकृत्या च धनेन च ।।"[११४]

इति अभिमन्त्र्य–

"मृत्तिके ब्रह्मदत्ताऽसि काश्यपेनाभिमन्त्रिता ।"

---

१०८. पद्मपुराणम्, सृष्टि., इति आ.सा., पृ– ६६
१०९. पद्म.पु. २०/१४७, आ.सा., पृ– ६०
११०. पद्म.पु. २०/१४८, आ.सा., पृ– ६६
१११. पद्म.पु. २०/१४९, आ.सा., पृ– ६६
११२. पद्म.पु. २०/१५०, आ.सा., पृ– ६७
११३. पद्मपुराणमिति आ.सा., पृ– ६०
११४. पद्मपुराणमिति आ.सा., पृ– ६७

इति गात्रच्छिद्रेषु मृत्तिकां लिपेत् । ततो नम इति मन्त्रेण तीर्थपरिकल्पन-तीर्थावाहनाचमनमार्जनान्तर्जलजपमज्जनानि कुर्यात् । तीर्थावाहने च 'नमो गङ्गामावाहयामि, नमो वरुणमावाहयामि' इति वा प्रयोगः । मज्जनं तु नद्याः स्रोतोऽभिमुखस्य । तडागादौ सूर्याभिमुखस्य सर्वत्र सूर्याभिमुखस्य वा । उद्धृतोदकस्नानेन मज्जनस्थले नम इति मन्त्राभावः । "गृहे चेदमन्त्रवत्" इति वचनात्, तत्र शब्दस्य प्रधानमात्रपरत्वात् । ततो जलादागत्य जले पादमेकं स्थले पादमेकं च कृत्वा–

"आचान्तः पुनराचामेन्मन्त्रवत् स्नानभोजनम् ।"[११५]

इति स्मरणात् । नम इति द्विराचमेत् । शिरःस्नानाशक्तौ कण्ठपर्यन्तं देहप्रक्षालनम् । कापिलस्मृत्युक्तप्रकारं कापिलस्नानं कुर्यात् । अथवा शरीरछिद्रस्थलानि जलेन प्रक्षाल्य–

"यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।"[११६]

इति विष्णुस्मरणं कुर्यात् । स्मरणाशक्तौ नारायणशब्दमात्रोच्चारणम् । 'सकृन्नारायणे'ति वचनात् । अथ वस्त्रान्तरेण शिरगात्रं च प्रोञ्छ्य यज्ञोक्तवस्त्रं परिधाप्य दद्यात् । यज्ञोक्तं च–

"न रिक्तमुल्वणं वासो न च नीलं प्रशस्यते ।
अक्षालितं पूर्वधृतं वासो न विभृयादपि ।।"[११७]

इत्यादि प्रतिषिद्धेतरमुत्तरीयं च यज्ञोपवीतवत् धारयेत् । 'उपवीतमस्यानुकूल्यम्' इति गौतमवचनात् ।

"निष्पीडयति यः पूर्वं स्नानवस्त्रं तु तर्पणात् ।
निराशास्तस्य पितरो यान्ति देवाः महर्षिभिः ।।"[११८]

इति तर्पणात्पूर्वं स्नानवस्त्रनिष्पीडनाभावः ।

---

११५. याज्ञवल्क्य इति कृत्यकल्प., पृ- ८९
आचान्तः पुनराचामेद्वासो विपरिधाय च । या.स्मृ. १/१९६

११६. यजुर्वेदीय नित्या. पद्ध., पृ- ४

११७. नरसिंहपुराणे ५८/७२, कृत्यकल्प. नियत. पृ- ८३

११८. योगीयाज्ञवल्क्य इति कृत्यकल्प.नियत. पृ- ८३

अथ तिलककरणम्

स्नातश्च तिलकं हृद्यं नित्यं कुर्याद् विशांपते ।
प्रियङ्गुचन्दनाभ्यां वा बिल्वेन तगरेण वा ।।
चन्दनेन मृदा वाऽपि कुर्यात् पञ्चललामकम् ।
ललाटकण्ठहृद्बाह्वोः सर्वकल्मषनाशनम् ।।
ललाटे वासुदेवाख्यं कण्ठे विष्णुमथाव्ययम् ।
प्रद्युम्नं चानिरुद्धं च बाह्वोर्हृदि तथाऽच्युतम् ।।[११९]

इति मृत्तिका तु गङ्गादितीर्थासम्भवे तुलसिमूलसम्भवाच्च । गुणफलार्थं तदुपादानेन पुरुषार्थरूपतिलकस्य तत एव सिद्धेः । अतः–

ऊद्ध्र्वपुण्ड्रं द्विजः कुर्यात् क्षत्रियाणां तथैव च ।
वैश्यादीनां तथा विप्रः शूद्रादेः मण्डलाकृतिः ।।[१२०]

इति वचनात् शूद्रस्य ऊद्ध्र्वपुण्ड्राभावः । बिन्दुरूपेण शिरसि तत्करणमिति संप्रदायः । वैष्णवस्य हरिमन्दिररूपोद्ध्र्वपुण्ड्रधारणमविरुद्धम् । सामर्थ्ये तु–

ऊद्ध्र्वपुण्ड्रं प्रकुर्वीत न शूद्रस्तु कदाचन ।

इति वाक्यस्य प्रामाण्येऽपि वैष्णवातिरिक्तशूद्रपरत्वम् । शङ्खचक्रगदापद्मादिना नारायणायुधकरणं च । तच्च गोपिकाचन्दनेन तुलसीमूलमृत्तिकया वा ।

विलिखेद्[१२१] देवचिह्नानि तुलसीगोपीकामृदाम् ।
ललाटे[१२२] केशवं विद्यान्नारायणमथोदरे ।।
माधवं हृदये चैव गोविन्दं कण्ठकूपके ।
उदरे दक्षिणे पार्श्वे विष्णवे नम उच्यते ।।
तत्पार्श्वे बाहुमूले तु स्मरेद् वै मधुसूदनम् ।।

---

११९. आ.सा., पृ- ९१
१२०. पाद्मे इति आ.सा., पृ- ९२
१२१. आ.सा., पृ- ९५
१२२. आ.सा., पृ- ९३-९४

त्रिविक्रमं कर्णपार्श्वे वामे कुक्षौ तु वामनम् ।
श्रीधरं बाहुके वामे हृषीकेशं तु कण्ठके ।।
पृष्ठतः पद्मनाभं तु दामोदरं ककुद्यपि ।
लक्ष्मीं वक्षःस्थले देवीं वासुदेवं च मूर्धनि ।।
नामानि द्वादशैतानि नमस्कारयुतानि च ।
प्रयुञ्जीत हरिं ध्यात्वा वासुदेवेति मूर्द्धनि ।।

इत्येवं विहितस्थानमन्त्राः । अत्यन्ताशक्तौ–

ललाटे वासुदेवाख्यं कण्ठे श्रीपुरुषोत्तमम् ।
नाभौ नारायणं स्मृत्वा सर्वपापैः प्रमुच्यते ।।

एवं– नारायणायुधैर्युक्तं कृत्वाऽऽत्मानं कलौ युगे ।
कुरुते पुण्यकर्माणि मेरुतुल्यानि तानि तु ।।
चक्राङ्कितनुर्भूत्वा यः श्राद्धं कुरुते नरः ।
तत्सर्वं प्रतिगृह्णाति गङ्गायां च गदाधरः ।।

तत्र मन्त्राः[१२३]–

पाञ्चजन्यनिजध्वानध्वस्तपातकसञ्चय ।
त्राहि मां पापिनं घोरं संसारार्णवपातनम् ।।
सुदर्शन निजज्योतिर्ध्वस्तपातकसञ्चय ।
अज्ञानान्धस्य मे नित्यं विष्णोः मार्गं प्रदर्शय ।।
संसारभयत्राणानां योगिनामभयङ्करः ।
पद्महस्तेन यो देवो योगेशस्त्वं नमाम्यहम् ।।
ब्रह्माण्डभुवनारम्भमूलस्तम्भगदाधरः ।
कौमोदकी करे यस्य तं नमामि गदाधरम् ।।

इति सर्वत्रापि तिलकग्रहणे नम इत्येव मन्त्र इति सम्प्रदायः । ततः सपवित्रदक्षिणकरः सोपग्रहवामहस्तः प्राङ्मुख उपविश्य सकुशत्रयेण वामहस्तादारभ्य दक्षिणहस्तेन सति सम्भवे साक्षतेन नमो देवांस्तर्पयामीति वारत्रयं जलं क्षिपेत् । एवं नमो ऋषींस्तर्पयामीति त्रिः । ततः प्राचीनावीति दक्षिणामुखः केवलेनाञ्जलिना सति सम्भवे सुवर्णरजत-

१२३. आ.सा., पृ- ९५-९६

ताम्रपात्राणि इति अन्येन तीर्थेन द्विगुणीकृतान् कुशान् गृहीत्वा सति सम्भवे तिलांश्च गृहीत्वाऽञ्जलिं गोशृङ्गपर्यन्तमुत्तोल्य तर्जन्यङ्गुष्ठमध्येन पितृतीर्थेन कुशाः ततः भूमौ जलेन वा 'नमः पितॄंस्तर्पयामीति' त्रिः प्रक्षिपेत् ।
ततो नम इति मन्त्रस्थले स्नानसाटीनिष्पीडनम् इति ।
ततः पुष्पतिलादिसहितमर्घ्यपात्रशुद्धिपर्यन्तमुत्तोल्य–

नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे ।
जगत्सवित्रे शुचये सवित्रे कर्मदायिने ।।[१२४]

इति सूर्यायार्घ्यो नम इति मन्त्रेऽर्घ्यदानम् । नम इति मन्त्रेण वा–

प्रातः द्विजान् नमस्कृत्य विचरेत् तदनुज्ञया ।

इति वचनात् 'अमुक दासोऽहं नमामी'त्येवमुच्चार्य नमस्कुर्यात् ।

—o—

द्वितीयभागकृत्यम्

ततः द्वितीयभागे वेदाभ्यासः ।

नोच्चरेत् प्रणवं मन्त्रम् ।
नोच्चरेत् संस्कृतां गिरम् ।
नोच्चरेत् वेदवचनम् ।।

इत्यादिना निषिद्धत्वात् । वेदाक्षरविचारस्य पातित्यकरत्वाभिधानात् च न तत्राधिकारः । अन्येषां तु विद्यास्थानानां शिल्पसङ्गीतादि-शास्त्राणामभ्यासं द्वितीयभागे कुर्यात् । न तु–

नोच्चरेत् संस्कृतां वाणीम् ।

इति संस्कृतवचनमात्रस्योच्चारणनिषिद्धत्वात् । कथमन्यविद्याभ्यास इति वाच्यम् । निषेधस्योन्मार्गप्रस्थितशूद्रविषयत्वात् । धर्मार्थौ शूद्राणां 'धर्मेप्सवस्तु'[१२५] इत्यादि मनुवचने मन्त्रवर्ज्यसर्वद्विजातिकर्मस्वधिकारस्य दर्शितत्वात् । सङ्गीतशिल्पादेः वृत्तित्वेनाभिधानात् । तल्लक्षणं विना च तत्करणासम्भवात् । तल्लक्षणाध्ययनस्यावश्यकत्वात् । एवं

---

१२४. विष्णुपुराणे ३/११/३९ इति कृत्यकल्प.नियत. पृ- १३९

१२५. मनु. १०/१२७

विष्णुसहस्रनामादिस्तोत्रपाठोऽपि कर्त्तव्यः । तत्र हि उपक्रमे–

किं जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ।।[१२६]

इत्यादिना मनुष्यमात्रस्याधिकारत्वश्रवणात् । उपसंहारे[१२७]–

य इदं शृणुयान्नित्यं यश्चापि परिकीर्त्तयेत् ।

इति श्रवणे कीर्त्तने विद्यायाः कार्याकांक्षायामविशेषेण ।

शूद्रः सुखमवाप्नुयात् ।

इति वचनात् । न चास्य कीर्त्तनातिक्रमणमात्रविषयत्वम् । अतिक्रमणाचरणाभावात् । न च–

त्रिविधैव ज्ञायते कर्त्ताविशेषेण प्रतिक्रियम् ।
योग्यता प्रतिषिद्धत्वविशेषोपादानार्थयैः ।।[१२८]

इति वार्तिकात् प्रसिद्धाध्ययनस्य शूद्रस्य केवलं श्रवण एवाधिकार इति वाच्यम् । सामान्यपुराणपाठाध्ययननिषेधस्य विशेषेण अज्ञातविषयत्वमित्युक्तत्वात् । श्रवणविधेरनुष्ठानाङ्गस्योपपादनाच्च । भाष्यकृतस्तु[१२९]–

शूद्रः सुखमवाप्नुयात् ।

इत्यत्र श्रवणेनैवेति व्याचक्षाणाः कीर्त्तनेन शूद्रस्याधिकारं न मेनिरे । विप्रभक्तौ च सर्वेषामधिकारः ।

स्त्रियो वैश्यास्तथा शूद्राः ।[१३०]

इत्यादिना भगवद्गीतायामेव दर्शितत्वात् । भगवद् भक्त्यङ्गं भगवन्नामकीर्त्तनवादनात्मसमर्पणादिकमत्रैवाहरणम् । कुशाहरणं तु शूद्रेण न कर्त्तव्यम् ।

"न दर्भान्नुद्धरेच्छूद्रः" इति वचनात् ।
शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन् पतत्यधः ।।

---

१२६. विष्णुसहस्रनाम., श्लो. ३,४ (म.भा.शा.प.)
१२७. विष्णुसहस्रनाम., श्लो. १२२ (म.भा.शा.प.)
१२८. श्रा.प्र., पृ- १३२
१२९. श्रा.प्र., पृ- १३२, विष्णुसहस्रनाम. श्लो. १२३
१३०. भगवद्गीता. ९/३२

इति वचनात् । द्विजातीनामेव शूद्रानीतजलादिना कर्मकरणे दोषः । न शूद्रस्यापि स्वयमानीतजलेनापि कर्मकरणे दोषसंभवात् । न चैतत् वचनबलात् शूद्रस्य स्वयमाहरणं नास्तीति हव्यवाहनादिना त्रैवर्णिको जलादन्यनार्यकर्मकरण इति वाच्यम् । स्वयमाहरेदिति विधेर्न चैकं प्रतिशिष्यत इति न्यायेन शूद्रसाधारण्येनापि प्रवृत्तेः । तस्यापि स्वयमाहरणविधानात् ।

शूद्रानीतैरित्यस्य द्विजातिमात्रविषयत्वात् । स्वयमाहरणविधि-प्रशंसापरत्वाद् वा । तेन शूद्रः स्वयमानीतजलादिना वा कर्म कुर्वन् प्रत्यवायात् । "न दर्भान्नुद्धरेत्" इत्यत्र दर्भपदस्य यज्ञीयपदार्थ-मात्रपरत्वात् कुशसमिधादिभिः ब्राह्मणद्वारा आनीतैः कर्म कुर्यादिति निष्कर्षः । एवं-

"पुराणं शृणुयान्नित्यम् ।"

एवं विहितपुराणश्रवणमात्रं कार्यम् । अनुष्ठानोपयोग्यार्थस्य श्रवणस्य तदानीमेवोचिततत्वात् ।

"इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत् ।"[१३१]

इति तु सुखार्थपुराणश्रवणविषयम् । तेन काम्यपुराणश्रवणमपि द्वितीयभागे कर्त्तव्यमिति अभियुक्तः ।

—o—

अथ तृतीयभागकृत्यम्

तृतीये चैव भागे तु पोष्यवर्गार्थसाधनम् ।।[१३२] इति ।
माता पिता गुरुर्भार्या प्रजा दीनः समाश्रितः ।
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः ।।[१३३]
ज्ञातिर्बन्धुर्जनः क्षीणस्तथाऽनाथः समाश्रितः ।
अन्योऽपि धनयुक्तस्य पोष्यवर्ग उदाहृतः ।।

१३१. दक्षस्मृ. २/७०
१३२. दक्षस्मृ. २/३६
१३३. दक्षस्मृ. २/३७-३८

उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये ।।[१३४]

पोष्यवर्गश्च मातापितृगुरुभार्यापुत्राश्रितातिथिप्रभृतयः । एतेषां पोषणार्थं द्रव्यार्जनोपायं कुर्यात् । याज्ञवल्क्येनापि[१३५] "भृत्य भर्त्तव्यादिना, भृत्यभरणेनावश्यकत्वेनोक्तभावात् । तेन तदानीं वृत्त्यर्थं द्विजाति-शुश्रूषणं कर्त्तव्यम् ।"

'सव्येन द्विजातीनां पुनः । प्रकल्प्य तस्य वै वृत्तिः ।
स्वकुटुम्बं यथा हितः ।
शक्तिं चावेक्ष्य दास्यं च भृत्यानां परिग्रहणम् ।।'

इति वचनात् वृत्तिः कल्प्या । तच्च जीर्णवसनादिनेत्युक्तम् । तेन जीवनासम्भवे वणिक्वृत्त्या जीवनम् । वणिक्वृत्तिश्च कृषिगोरक्षा-वाणिज्यादि । नृसिंहपुराणे च– 'वृत्त्यर्थं च कृषिं चरेत्' इति कृषिः स्वातन्त्र्येणोक्ता । वाणिज्ये तु विशेषः–

लवणं मधुतैले च दधिसक्तं घृतं पयः ।
न दुष्येच्छूद्रजातीनां कुर्वन् शूद्रः न दोषभाक् ।।
मधु चर्म सुरां लाक्षां मुक्तामांसं च पञ्चमम् ।।

इति वचनात् । एतत् पञ्चमातिरिक्तवस्तुविषयकं वाणिज्यं कार्यम् । मधुपदं शतमाध्वीपरम् । तेन माध्वीपैष्ट्योरुभयोरिति विक्रयप्रतिषेधः । लवणं मधु तैले त्वत्र मधुपदं क्षौद्रपरम् ।

न चेह शूद्रः पतति मांसादेरपि विक्रये । इति ।
'सर्वाशी सर्वविक्रयी' इत्यादिकमापद्विषयम् ।
विक्रीय मदमांसानि अभक्ष्यस्य च भक्षणात् ।
कुर्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात् ।।

तत्रापि जीवने नानाविधैः शिल्पैः जीवनम् । तथा च देवलः[१३६]–

"शूद्रधर्मो द्विजातिशुश्रूषा पापवर्जनं कलत्रादि पोषणकर्षण-

---

१३४. या.स्मृ. १/१००

१३५. या.स्मृ. १/१२१

१३६. मिताक्षरा., पृ- ४०

पशुपालनभारोद्वहनपण्यव्यवहारचित्रकर्मनृत्यगीतवेणुवीणामुरजमृदङ्ग-वादनादीनि" इति । वणिक्वृत्त्या जीवनमप्यस्य प्रशस्तम् ।

"शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः ।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् ।।[१३७] इति ।

गोपालनादिना जीवतां भोज्यान्नत्वप्रतिपादनात् । एवमर्थसाधनप्रस्तावे-

यतीनां दर्शनं चैव स्पर्शनं भाषणं तथा ।
कुर्वाणः पूयते नित्यं तस्मात् पश्येत्तु नित्यशः ।।[१३८]

एवम्- अग्निचित् कपिला सत्री शतायुर्धार्मिकः शुचिः ।
ज्ञानवृद्धान् तपःसिद्धान् दृष्ट्वा पापात् प्रमुच्यते ।।[१३९]
दृष्टमात्राः पुनन्त्येते तस्मात् पश्येत्तु नित्यशः ।
लोकेऽस्मिन् मङ्गलान्यष्टौ ब्रह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाऽष्टमः ।।[१४०]
एतानि सततं पश्येन्नमस्येदर्चयेच्च यः ।
प्रदक्षिणं च कुर्वीत तथाऽस्यायुर्न हीयते ।।

इत्यादिवचनात् । यथासम्भवमेषां दर्शनस्पर्शनसम्भाषणाभिवादनादीनि कुर्यात् ।

—o—

चतुर्थभागकृत्यम्

ततः सेवाद्यविरोधेन चतुर्थभागे स्नानम् । शूद्राणां च न प्रातःस्नानमिति विद्यानिवासः ।

चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् ।[१४१]

---

१३७. या.स्मृ., १/१६६

१३८. छागलेयः इति कृत्यकल्प.नियत., पृ- ३०

१३९. यम इति कृत्यकल्प.नियत., पृ- ३०

१४०. नारद १७/५४,५५ इति कृत्यकल्प.नियत., पृ- ३१

१४१. दक्षस्मृ. २/४४, कृत्यकल्प.नियत. पृ- ३३

इति यथोक्तलक्षणां मृत्तिकां गृहीत्वा-

ब्राह्मक्षत्रविशां चैव मन्त्रस्नानमितीष्यते ।

तूष्णीमेव तु शूद्रस्य नमस्कारस्तथा स्मृतम् ।।

इति पूर्ववदेव 'नारायणाय नमः' इति मन्त्रेण तीर्थादि परिकल्पना, मार्जना तद् जलजपमज्जनादिकं कुर्यात् । इदं च स्नाननिषेधेतरदिने मलापकर्षणार्थं तैलग्रहणपूर्वकं कार्यम् । तैलग्रहणे च-

कुहूसंक्रान्तिपूर्णेन्दुचतुर्दशीष्वमासु च ।

नरश्चण्डालयोनौ स्यात् तैलस्त्रीमांससेवनात् ।।

निषिद्धास्तिथयः । "चित्रासु हस्तग्रहणेषु तैलम्" इत्येतानि नक्षत्राणि ।

हृत्तापकीर्त्तिमरणं सुतश्च वित्तस्य नाशो निधनत्वमायुः ।

सूर्यादि सौरात्रिदिनेश्वराणां तैलोपभोगे क्रमशः फलानि ।।

यत्तु चिन्तामणौ-

पञ्चमी दशमी चैव पूर्णिमा च त्रयोदशी ।

एकादशी द्वितीया च द्वयोरपि च पक्षयोः ।।

अभ्यङ्गस्नानपानाद्यैर्योऽत्र तैलं निषेवते ।

चतुर्णां तस्य वृद्धिः स्याद्धनापत्यबलायुषाम् ।। इति ।

गुरुशुक्रवारावपि निषिद्धौ । एवम्-

पितृश्राद्धे प्रगे स्नाने द्वादश्येकादशीषु च ।

सुरास्नानसमं तैलं तस्मात्तैलं विवर्जयेत् ।।[१४२]

इत्यादावपि निषिद्धम् । अत्र तैलपदं सतिलप्रभवस्नेह एव रूढत्वात् । सार्षपादिग्रहणे च न दोषः ।

पक्वतैलं वाऽन्यतैलं सार्षपपुष्पवासितम् ।

वर्ज्याहःस्वप्यदुष्टं स्याद् द्रव्यान्तरयुतं तथा ।।

रोगान्तरस्यार्थादपि तैलं जातु न दुष्यति ।।[१४३]

इत्युपपत्तेः । इदं च मध्याह्नस्नानम् । कामनाविशेषे तीर्थादौ प्रातः-

---

१४२. आ.सा., पृ- २२९

१४३. आ.सा., पृ- २२८

स्नानम् । एवं स्नात्वा यथोक्तवस्त्रं परिधायोपवीतवदुत्तरीयवस्त्रं कृत्वा पूर्ववत् तिलकं कुर्यात् ।

ततश्च प्राङ्मुख आचमनं कुशेषु उपविष्टः कुशपाणिः सम्पुटीकृत हस्तद्वयमध्ये कुशत्रयं गृहीत्वा नम इति मन्त्रेण ब्राह्मयज्ञं कृत्वा तत्कुशत्रयमुत्तरस्यां दिशि निक्षिपेत् ।

ततः पद्मपुराणोक्तविधिना तर्पणम् । देवतीर्थेन पुष्पाक्षत-मिश्रितजलैः प्रत्यग्रकुशत्रयं स्थापयित्वा अक्षतकुशत्रयसहितेन दक्षिणहस्तेन तत्र देवानामावाहयेत्। नमो ब्रह्मादयो देवा अत्रागच्छतेति । ततः साग्रं कुशत्रयं दक्षिणहस्ते कृत्वा सति सम्भवे चाक्षतं देवतीर्थेन ब्रह्मा तृप्यतामिति जलं क्षिपेत् । एवं विष्णुस्तृप्यताम्, इन्द्रस्तृप्यतामिति । ततोऽञ्जलिर्गृहीत्वा–

देवाः यक्षास्तथा नागा गन्धर्वाऽप्सरसोऽसुराः ।
क्रूराः सर्पाः सुपर्णाश्च तरवो जम्भकाः खगाः ।।
विद्याधरा जलधारास्तथैवाकाशगामिनः ।
निराधाराश्च ये जीवाः पापेऽधर्मे रताश्च ये ।
तेषामाप्यायनायैतद्दीयते सलिलं मया ।।[१४४]

इति एकमञ्जलिं दद्यात् । ते उत्तराभिमुखमुत्तरीयं कण्ठलम्बितं कृत्वा तस्मिन्नेव कुशत्रये सनकादयोऽत्रागच्छेत्यावाह्य–

सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव बोढुः पञ्चशिखस्तथा ।।
सर्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ।।[१४५]

इति अञ्जलिमध्यस्थितकुशत्रयमध्ये अञ्जलिद्वयं प्रत्येकं दद्यात् । ततश्च पुनः सव्ये मरीच्यादयोऽत्रागच्छतेत्यावाह्य देवतीर्थेन मरीचिस्तृप्यतामिति जलं क्षिपेत् । एवमङ्गिरस्तृप्यताम्, प्रचेतस्तृप्यताम्, वसिष्ठस्तृप्यताम्, भृगुस्तृप्यताम्, नारदस्तृप्यतामिति तर्पयेत् ।

---

१४४. पद्मपु. सृष्टि. २०/१५६-१५८, कृत्यकल्प.नियत. पृ- ११६
१४५. पद्म.पु. सृष्टि. २०/१६०,१६१, कृत्यकल्प.नियत. पृ- ११७

ततः प्राचीनावीतिपूर्वस्थापितं कुशत्रयं दक्षिणाभिमुखं कृत्वा नमो दिव्या पितरोऽत्रागच्छत । नमोऽस्मत् पितृगणा अत्रागच्छतेत्यावाह्य सुवर्णरजतखड्गपित्राद्यन्यतमपात्रेणाञ्जलिस्तिलेन द्विगुणीकृतकुशत्रय-सहितेन सति सम्भवेषु तिले गोशृङ्गमात्रोत्थितेन केवलेनाञ्जलिना वा त्रींस्त्रींस्तर्पयेत् । अग्निस्वधाः पितरः तृप्यतामिदं जलं तेभ्यो नमः । हविष्मत्पितरस्तृप्यतामिदं जलं तेभ्यो नमः । एवं बर्हिषद पितर-स्तृप्यतामिदं जलं तेभ्यो नमः । सकुलिनः पितरस्तृप्यतामिदं जलं तेभ्यो नमः । आज्यपा पितरस्तृप्यतामिदं जलं तेभ्यो नम इति प्रत्येकमञ्जलित्रयं दद्यात् ।

ततो नमोऽस्मत्पितृगणा अत्रागच्छेत्यावाह्य अमुकसगोत्रोऽस्मत् पिताऽमुकदासस्तृप्यतामिदं जलं तस्मै नम इत्यादिना अञ्जलित्रयं दद्यात् । एवं पितामह-प्रपितामहयोः ।

ततोऽमुकसगोत्रा अस्मन्माता अमुका दासी तृप्यतामिदं जलं तस्यै नम इति मात्रे अञ्जलित्रयम् । एवं पितामही-प्रपितामहयोः प्रत्येकमञ्जलित्रयम् । एवं नमोऽमुकसगोत्रास्मत् मातामह अमुकदास-स्तृप्यतामिदं जलं तस्मै नम इति अञ्जलित्रयम् । एवं प्रमातामह-वृद्धप्रमातामहयोः । एवं पुत्ररहितमातुः सपत्नी-ज्येष्ठभ्रातृ-पितृ-ज्येष्ठभ्रात्रादिभिः एकैकमञ्जलिं दद्यात् । ततः-

येऽबान्धवाः बान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते तृप्तिमखिलां यान्तु ये चास्मत्तोयकांक्षिणः ।।[१४६]

इत्यञ्जलित्रयं दद्यात् । ततश्च स्नानवस्त्रं निष्पीड्य-

ये चास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः ।
पिबन्तु ते मया दत्तं वस्त्रनिष्पीडनोदकम् ।।[१४७]

इत्यञ्जलित्रयं दद्यात् । अत्र सामान्ये पूर्वोक्तनृसिंहपुराणीयं तर्पणं कुर्यात् ।

---

१४६. पद्म.पु. सृष्टि. २०/१६७, कृत्यकल्प.नियत. पृ- ११७
आ.सा., पृ- ३०३

१४७. आ.सा., पृ- ३०३

तत्र पद्मपुराणीयतर्पणे शूद्राणामधिकारः । पौराणिकत्वेन साक्षादुपदेशात् ।

यत्तु 'शूद्रा वाजसनेयिवदि'ति वाजसनेयीतर्पणं करणं तदयुक्तम् । उपदेशाभाव एवातिदेशप्रवृत्तेः । तस्मात् श्राद्धादावेवास्यातिदेशस्य प्रवृत्तिर्न तर्पणेऽपीति । पूर्वोक्ततर्पणासामर्थ्ये च–

आब्रह्मस्तम्बपर्यन्तं जगदेतच्चराचरम् ।
मया दत्तेन तोयेन तृप्यत्वैतच्चतुर्विधमिति ।।[१४८]

इत्यनेन जलाञ्जलिं दद्यात् । ततः शालिचूर्णादिना अष्टदलपद्मं विलिख्य तत्र सूर्यं पूजयित्वा पूर्वोक्तमन्त्रेण सूर्यायार्घ्यं दद्यात् । ततस्ताम्रपात्रे जलं पूरयित्वा नमो ब्रह्मणे नम इति । नमो विष्णवे नम इति । नमो रुद्राय नम इति । नमो सवित्रे नम इति । नमो मित्राय नम इति । नमो वरुणाय नम इति ।

गन्धपुष्पादीनामसम्भवे जलमात्रेणादभ्यश्च निरञ्जनं स्वमात्मना ध्यात्वा नम इति सूर्यं निरीक्ष्य नम इत्युपस्थाय नम इति जलेन पाणिभ्यां मुखं सम्मार्ज्य प्रदक्षिणीकृत्य नमो दिग्भ्यो नमः, नमो दिग्देवताभ्यो नम इत्युक्त्वा ब्रह्मणे नमोऽग्नये नमः, पृथिव्यै नमः, औषधिभ्यो नमः, वाचे नमो, वाचस्पतये नमो, महते नमोऽद्भ्यो नमोऽपांपतये नमोऽरुणाय नम इति दत्त्वा नमस्कृत्य नम इति जपित्वा जपं परमात्मनि समर्प्य तीर्थं विसर्जयेत् । शिरःस्नानाभावे च नमो ब्रह्मणेत्यादि जलपूजाभाव इति केचित् । एवं च स्नानाङ्गतर्पणेनैव पुरुषार्थतर्पणनिर्वाहः ।

ततः स्वगृहमागत्य प्रक्षालितपादः स्वाचामं देवताऽऽगारं प्रविश्य विष्णुं स्मृत्वा पूजागारं प्रोक्ष्य पश्चिमाभिमुखं देवं कल्पयित्वा स्वयं प्राङ्मुख उदङ्मुखो वा नम इति स्वस्तिकपद्मादि अत्यन्तमासनं बद्ध्वा स्वशरीरशुद्ध्यर्थं स्वहृदयमध्ये विष्णुं चिन्तयेत् । ततो नम इति जलेन भूमिं प्रोक्ष्य तत्र षट्कोणं वा मण्डलं लिखित्वा दशकलात्मने वह्निमण्डलाय नम इति तत्र पुष्पं दत्वा त्रिपर्दिकां संस्थाप्य नम इति शंखं प्रक्षाल्य नम इति तदुपरि शंखं स्थापयित्वा नम इति गन्धादिकं दत्वा

१४८. ब्रह्माण्डपुराणमिति. आ.सा., पृ- ७०

नम इति जलं पूरयित्वा, धेनुमुद्रया चामृतीकृत्य मत्स्यमुद्रया चापिधाय नम इत्यष्टधा जपेत् ।

ततः प्रोक्षणपात्रे जलं पूरयित्वा किञ्चिदर्घ्यं मृद्भिः जलेन देवतासमानं पूजोपकरणं च प्रोक्षयेत् । ततो जलेन प्रतिमायां वा नमो गणपतये नमः, गणपतिमावाहयामि, गणपति अत्रागच्छ, नमो गणपतये पुष्पं नमः, नमो गणपतये गन्धो नम इत्यादि क्रमेण यथासम्भवोपचारैः पूजयेत् ।

शिवं भास्करमग्निं च कौशिकीं केशवं तथा ।
मनसा चार्च्चयन् याति देवलोकादधोगतिम् ।।

इति वचनात् एषां पूजा कर्त्तव्या ।

वरं प्राणपरित्यागः शिरसो वाऽपि कर्त्तनम् ।
सदा संपूजयेद् देवं भगवन्तं जनार्दनम् ।।

इति विष्णुपूजा भोजनार्थत्वेनावश्यकी ।

ब्राह्मणाः क्षत्रियाः वैश्याः स्त्रियः शूद्रास्तथैव च ।
संपूज्य तं मुनिश्रेष्ठ प्राप्नुवन्त्यभिवांछितम् ।।

इत्यभिवांछितफलत्वेन काम्याऽपि ।

ततो नमो विष्णवे । नमो विष्णुमावाहयामि । विष्णोऽत्रागच्छ । नमो विष्णवे नम इति क्रमेण यथासम्भवोपचारेण पूजागृहीतमन्त्रस्य तु कर्मानुसारेण पूजा । केशवादौ च नमः । केशवाय नमः, कीर्त्यै नमः नम इति प्रयोगः । आसनादिकं दत्त्वा वनमालादिमन्त्रस्थाने च नमःपदमेव । प्रधानमात्रमेव शूद्रस्य ग्रहणाधिकारः ।

स्वाहाप्रणवसंयुक्तः मन्त्रः शूद्रे दददद्विजः ।
शूद्रो निरयमार्गः स्याद् द्विजः शूद्रत्वमाप्नुयात् ।।

इति वचनात् स्वाहाप्रणवसंयुक्तोऽप्यष्टादशाक्षरगोपालमन्त्रादौ सर्वेषु वर्णेषु तथा आश्रमेषु नारीषु नानाद्यन्यजन्मकेषु इति क्रमदीपिकायां शूद्रस्याधिकार दर्शित इति । अन्यत्रापि वैदिकमन्त्रेषु कर्मसु च तेषामधिकार इति वदति । शूद्रस्य विष्णुपूजा स्वेष्टदेवतापूजैवावश्यकी । न गणपत्यादि पूजाऽपीति विद्यानिवासः ।

अथ वैश्वदेवः

स च पाकसाधनात् तेनाग्नौ लौकिके वाऽग्नौ कर्त्तव्यः । तदसम्भवे जले क्षितौ वा ।

लौकिके वैदिके वाऽग्नौ हुतोच्छिष्टे जले क्षितौ ।
वैश्वदेवस्तु कर्त्तव्यः पञ्चसूनापनुत्तये ।।[१४९]

इति वचनात् पूर्वाभिमुखं गोमयोपलिप्तवासभूमौ चतुरस्त्रमण्डलं कृत्वा तत्पूर्वभागेऽग्निं स्थापयेत् । नम इति मन्त्रेण तण्डुलं प्रोक्ष्य द्वादशपर्वं पूरयित्वा पाणौ हुत्वा जुहुयात् । जलेऽपि वह्निकार्यकारित्वात् पर्युक्षणम् । अवभृथे जले संमार्गवत् संस्काराणामपूर्वप्रयुक्तत्वात्, पर्युक्षणस्य वैश्वदेवस्याङ्गत्वात्, परिसमूहनादेश्च वह्नित्वात् परित्यागेनैव होमसाधनाङ्गसंस्कारकत्वात् न तेषां प्रवृत्तिः । नमो ब्रह्मणे नम इति होमः । एवं नमः प्रजापतये इति त्यागः । एवं गुह्याय कश्यपायानुमतये इति पञ्चाहुतिहोमः ।

ततश्चाग्नेः पश्चाज्जलं सिक्त्वा तत नम इति बलिं दत्वा तदुपरि जलं दत्वा तच्च पात्रान्तरे जलं पूरयित्वा कर्त्तव्यम् । मध्येऽब्भ्यो नमः । नमो विश्वेभ्यश्च भूतेभ्यो नमः । तदुत्तरे च उषसे नम इति । ततो मध्ये दक्षिणेऽपसव्येन पितृतीर्थेन नमः । नमो यज्ञपतेऽवनेजन इति नमः ।

तत उत्तराभिमुखः । नम सनकादि सप्तमनुष्येभ्यः इदमन्नं नम इति देवतीर्थेन दद्यात् ।

नित्यश्राद्धम्

अब्तिलैः पाणिनैवार्घ्यो देयोत्सर्गः क्षयस्तथा ।
स्वधावाचनमित्येतत् नित्यश्राद्धे चतुष्टयम् ।।[१५०]

इति वचनात् नमोऽमुकसगोत्र अस्मत्पितृपितामहप्रपितामहाः अमुकदासा एष वोऽर्घ्यं नम इति तिलसहितजलेन हस्तेन विष्टरब्राह्मणेऽर्घ्यं दद्यात् । नमोऽमुकसगोत्रा अस्मत् पितृपितामहप्रपितामहा अमुकामुकामुकदासा

१४९. शातातप इति गदाधरपद्धतिः, पृ- ३०३

इदमामान्नं सोपकरणं वो नम इत्युत्सृज्य इदमस्मत् पित्रे पितामहाय इति त्यागं कुर्यात् ।

पितरो यत्र पूज्यन्ते आब्दिकेन विना नरैः ।
तत्र मातामहाः पूज्या एष धर्मः सनातनः ।।[१५१]

इति स्मरणात् । अर्घ्यदानपूर्वकं मातामहश्राद्धम् । इदमामान्नं ब्राह्मणेभ्यो दद्याज्जलमूर्ध्वं प्रक्षिपेत् । तत्र गोदोहनमात्रं प्रतीक्ष्य नम इदं सोपकरण-मामान्नम् अतिथये नम इति दद्यात्। साक्षाद् ब्राह्मणोपस्थितौ विष्णुरद्य विष्णुप्रीतिकामो यथा नामसगोत्रायास्मै ब्राह्मणाय सोपकरणमन्नमहं संप्रदद इति वाक्यमुच्चार्य दद्यात् । घासमुष्टिं तण्डुलसहितं गृहीत्वा-

सौरभेय्यः सर्वहिताः पवित्राः पुण्यराशयः ।
प्रतिगृह्णन्तु मे ग्रासं गावस्त्रैलोक्यमातरः ।।[१५२]

इत्युक्त्वा भूमौ निक्षिपेत् । ब्राह्मणमग्रे स्थापयित्वा तदनुमत्यैव वैश्वदेवादिकरणमिति गौडाः । अयं च वैश्वदेवः पार्वणपितृश्राद्धे अमावास्यादौ मृताहपितृब्राह्मणे च श्राद्धस्यानन्तरं कार्यः । मातृश्राद्धे एकोद्दिष्टश्राद्धदिने च श्राद्धात् पूर्वमेव कर्त्तव्यः । तथा च अस्मत्पितृचरणानां संग्रहश्लोकः-

श्राद्धस्यानन्तरं कार्यः श्राद्धाहे वैश्वदेवकम् ।
पितृश्राद्धे तु पूर्वस्मादेकोद्दिष्टं तथेप्सतः ।। इति ।

भोजनम्

गोमयेनोपलिप्तायां भूमौ तण्डुलचूर्णेनार्द्धचन्द्राकारमण्डल-करणम् । पादौ पाणी प्रक्षाल्यानन्तरमाचम्य तत्रोपविशेत् । कामनाभावे प्राङ्मुखः । कामनायां च-

आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुंक्ते ह्युदङ्मुखः ।।[१५३]

१५०. श्रा.प्र. पृ- ६७
१५१. नित्या.पद्ध., पृ- १२७
१५२. ब्रह्मपु. इति कृत्यकल्प.नियत., पृ- १७३

इत्येवं कामनायामेव दिगभिमुखो भुंजीत–

पञ्चार्द्रश्चोपभुञ्जीत तथा शोषितमस्तकः ।

एवं च वीरासनो भुञ्जीतेति वचनादासनस्थः । यद्यपि–

भक्ष्याभक्षणेनाप्यस्य पेयापेयेषु वा पुनः ।
नियमो मुनिशार्दूलस्तेनासौ साध्यति रुतः ।।
'सर्वाशी सर्वविक्रयी' इति

वचनात्तस्य भक्ष्याभक्ष्यविवेक इति केचित् ।

विक्रीतान् मद्यमांसानि ह्यभक्ष्यस्य च भक्षणम् ।
कुर्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात् ।।

इति वचनात् शूद्रेणाऽपि त्रैवर्णिकाभक्ष्याणां परिहरणीयत्वात् । त्रैवर्णिकाभक्ष्याणि च तत्र प्रतिषिद्धानि विस्तरभयान्नेह लिखितानि । कपिलाक्षीरतद्विकारदधिघृतामिषादि हुतावशिष्टपुरोडाशादि च विशेषेण शूद्रस्याभक्ष्यम् । साक्षाद् ब्राह्मणोच्छिष्टं च । कपिलाक्षीरमात्रं शूद्रस्य प्रतिषिद्धम् । तथापि–

"पयांसि यत्र भक्ष्याणि तद्विकाराशने बुधः ।
तद्वद् देवव्रतं कुर्यात् ।"

इति प्रायश्चित्तविधिपर्यालोचनयाऽन्यपयोविकाराणामभक्ष्यत्वात् । न च पयांसि अन्यभक्ष्याणि इत्यत्र भक्ष्यपदं सर्वेषामभक्ष्यं यदनिर्देशाह-गोक्षीरादि तत्परमिति वाच्यम् । अभक्ष्यशब्दस्य सर्वभक्ष्यपरत्वे मानाभावात् । यद्यस्य भक्ष्यं पयस्तस्य तद्विकाराशने तद्वदेव प्रायश्चित्तमिति विशेषेणैव प्रायश्चित्तविधानात् । सामान्येनोपादानस्य शास्त्रार्थत्वात् ।

साक्षाद् ब्राह्मणोच्छिष्टमकृतदारपरिग्रहणस्य शूद्रस्यापि भक्ष्यं, "नोच्छिष्टं न हविष्कृतम्"[१५४] इति निषेधात् ।

"उच्छिष्टमन्नं दातव्यम्"[१५५] इत्यत्र उच्छिष्टपदस्य भाण्डोच्छिष्ट–

---

१५३. मनु. २/५२

१५४. मनु. ४/८०

१५५. मनु. १०/१२५

परतयाऽभियुक्तव्याख्यानात् । भोजनधर्मश्च द्विजातीनामेव स्मृत्यन्तरेभ्यो बोध्यः । पलाशमध्यपात्रे भोजनं शूद्राणां निषिद्धम् ।

"मध्यपात्रे न भुञ्जीत ब्रह्मवृक्षस्य मानिनि" इति शूद्राधिकारे ब्रह्मपुराणात् । तत्र च ब्रह्मवृक्षपदस्य किंशुकपरत्वेनाभियुक्त-व्याख्यानात् । एवम्–

"नैकाकी मृष्टमश्नीयात् ।
भार्यया[१५६] सह नाश्नीयात् ।
न भार्यादर्शनेऽपि च ।
न रात्रौ दधिसक्त्वादिभक्षणं च प्रशस्यते ।"

एवम्– "नाश्रुदर्शने नान्त्यजनदर्शने ।
नान्त्यजनवचःश्रवणे ।
न निशायां, विज्ञेया मध्यमं घटिकाद्वयम् ।
न विवस्त्रो, नैकवस्त्रो ।
नोत्कटभिन्नासनस्थो ।
न भिन्नपात्रे ।
न देवदर्शने ।
न चन्द्रग्रहणसमये ।"

एवम्– "सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयम् ।
चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विना ।।[१५७]
ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत् ।
नाद्यौ यामौ तु नाश्नीयाद् ग्रस्तास्तमितयोस्तयोः ।।"[१५८] इति ।

एवं ग्रहणकाले पक्वमप्यन्नं सर्वदाऽभोज्यम् ।

"श्रुतमन्नं विवर्जयेत्"[१५९] इति वचनात् श्रुतपदस्य तदानीं शृतविषयत्वात् । एवम्–

---

१५६. वसिष्ठ.धर्म., १२/३१
१५७. स्मृतिः इति का.दी., पृ– १४७
१५८. वसिष्ठ इति का.दी., पृ– १४७

"नाञ्जलिना भुञ्जीत । न मृत्पात्रे ।
नोच्छिष्टसन्निधौ ।"

इत्यादयो निषिद्धाः स्मृत्यन्तरेषु प्रसिद्धानुसन्धेयाः ।

अन्नं दृष्ट्वा प्रणमेत अस्माकमेतदस्त्विति ।।

नम इति विष्णुपादोदकेन तदन्नं प्रोक्ष्य नम इति जलचलुकं पिबेत् । ततः प्राणाय नमः । अपानाय नमः । उदानाय नमः । व्यानाय नमः। समानाय नम इति पञ्चप्राणाहुतिरनामिकाङ्गुष्ठाभ्यामश्नीत । मौनी भुंजीत । पात्रशेषं नीरं पिबेत् ।

प्राक्द्रव्यं पुरुषोऽश्नीयान्मुक्त्वा च कठिनाशनम् ।
अन्ते पुनः दिवाऽशी च बलयोगेन मुञ्चति ।।
अन्नेन पूरयेदर्धं तदर्धं तु जलेन वै ।
वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत् ।।

अन्ते क्षारमश्नीयान्न दधि । भोजनान्तरे ग्रासशेषे अवशेषयेत् । ततः सुतृप्तो नम इति जलचलुकं गृहीत्वा यथासुखमाचरेत् । ततो मुखशुद्ध्यर्थं ताम्बूलभक्षणं कृत्वा वामहस्तेनोदरमास्पृशेत् । तत इष्टदेवं स्मरेत् ।

प्राणाग्निर्धर्मप्रकाराः शूद्रेण न कर्त्तव्याः । द्विजोच्छिष्टभोजनेऽप्ययमेव क्रमः । वैश्वदेवाधिकारित्वात् द्विजोच्छिष्टं न भोक्तव्यम् । पुत्रादिभ्यो देयमिति भ्रमविशेषाभावादिति गौडाः । ते च द्विजातिसेवाया जीवितसेवाया अविरोधेन पुराणश्रवणम् । कृष्यादिना जीवितन्तु स्वातन्त्र्येणैव पुराणश्रवणम् ।

"इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत् ।"[१६०]

अष्टमे लोकयात्रा । सन्ध्याकाले तु पादपाणिप्रक्षालनं कृत्वा आचम्य भगवन्नामकीर्त्तनाभिवादनादि कार्यम् । रात्रौ स्याद् द्वियाममध्ये तु पूर्वोक्तरीत्या च भोजनम् । इति ।

---

१५९. षट्त्रिंशन्मते इति का.मा., पृ- ४७७

१६०. दक्षस्मृ. २/६९., कृत्यकल्पतरु.नियत., पृ- ३३३

शयनम्

सुवेषस्त्रक्चन्दनाद्यनुरंजिताभूषाद्यलंकृतः प्रहृष्टमनाः खट्वादावास्तृतायामदिष्टायां न मलिनायां जन्तुरहितायां शय्यायां शयीत ।

''नार्द्रपादो। न नग्नो । न लीनः शयीत।''

प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप ।
सदैव स्वपतः पुंसो विपरीतं तु रोषदम्[क] ।।[१६१]
सर्पापसर्प भद्रन्ते गच्छ सर्प वनान्तरम्।
जन्मेजयस्य यज्ञान्ते आस्तिक्यवचनं स्मर ।।''[१६२]
आस्तिक्यवचनं श्रुत्वा यः सर्पो न निवर्त्तते ।
शतधा भिद्यते मूर्द्धा गिरिर्वज्रहतो यथा ।।[१६३]
नर्मदायै नमः प्रातर्नर्मदायै नमो निशि ।
नमोऽस्तु नर्मदे नित्यं त्राहि मां विषसर्पतः ।।[१६४]

इति पठित्वा स्वप्यात्। 'नमो नन्दीश्वराय नमः' इति वदेत् ।

स्त्रियं सकामामनिषिद्धदिनेषूपेयात् । ततो मूत्रशौचाद् द्विगुणं शौचं कृत्वा शय्यान्तरे शयीत। ऋतुकाले त्वभिगमनानन्तरं पुंसा स्नानं कर्त्तव्यम्। त्वकृतं तदानीं तु नाशुद्धिर्निवर्त्तितत्वात् ।

''शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् ।''[१६५]

इति स्मरणात् । ऋतुश्च रजोदर्शनावधिकाः षोडशरात्रयः। तत्र प्रथमरात्रचतुष्टयं हित्वा युग्मासु पुत्रकामोऽयुग्मासु कन्याकामो गच्छेत्। अयुग्मास्वपि एकादशी-द्वादश्यौ निन्दिते। तत्र प्रथमरजोदर्शनकाले कुलिकादि नक्षत्राणि दोषसत्त्वे च दूर्वातिलाज्यैः जुहुयात्। तत्र सहस्त्रं

क. रोगदमिति ख-पुस्तकपाठः ।

१६१. विष्णुपुराणे इति कृत्यकल्प.नियत. पृ- ३३६
१६२. आ.सा., पृ- ४४७
१६३. आ.सा., पृ- ४४७
१६४. आ.सा., पृ- ४४७
१६५. याज्ञवल्क्य इति आ.सा., पृ- ४४९, अंङ्गिरा इति स्मृति.समु. पृ- ३

गायत्रीमन्त्रेण तदुक्तदोष इति विहितगायत्रीमन्त्रकरणको दूर्वातिलाज्यहोमः शूद्रेण ब्राह्मणद्वारा कर्त्तव्य इति केचित्तन्न ।

एतस्या गायत्र्या अधिकाराभावेन ब्राह्मणद्वारा तत्करणे मानाभावात्। परन्तु तद्दोषशान्तये हिरण्यादि दानमुचितमिति। प्रथमाभिगमने च स्वस्तिवाचनमावश्यकम् ।

"स्वस्तिवाच्यः स्त्रियं गच्छेत् ।"

इति ब्रह्मपुराणात्। अत्र च नान्दीमुखश्राद्धाभावः।

"विवाहादि कर्मगणो य उक्तो
गर्भाधानं सुश्रीमयस्य वाऽन्ते।
आदावादावेकमेवात्र कुर्या-
च्छ्राद्धं वादौ कर्मणः कर्मणः स्यात्।।"[१६६]

इति च बाह्वचपरिशिष्टात् । परं -

निषेके चैव सोमे च सीमन्तोन्नयने तथा।।[१६७]

इति विष्णुस्मरणात् । वृद्धिश्राद्धेतिकर्त्तव्यता मातृपूजादिकेत्यभियुक्ताः। वस्तुतस्तु नान्दीमुखश्राद्धस्य गर्भाधाने विहितप्रतिषिद्धत्वाद् विकल्प एवेति।

श्राद्धविधिः

मत्स्यपुराणे - एवं शूद्रोऽपि सामान्यं वृद्धिश्राद्धं च सर्वदा।
नमस्कारेण मन्त्रेण कुर्यादामान्नवद् बुधः।।[१६८]
आमश्राद्धं यदा कुर्याद् विधिज्ञः शास्त्रदस्तदा ।
तेनाग्नौकरणं कुर्यात् तेन पिण्डं च निर्वपेत्।।[१६९] इति।

ब्रह्मपुराणे - एष एव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते ।।[१७०]

---

१६६. गोभिल इति कृत्यकल्प. श्रा.का., पृ- २७५

१६७. भविष्यपु. इति कृत्यकल्प. श्रा.का., पृ- ७

१६८. कृत्यकल्प. नियत., पृ- २३५

१६९. मत्स्यपुराणम्., १८/२७

एवं च अमावास्याऽष्टकादि नित्यश्राद्धाद्यपि विधाय -

एतच्चानुपनीतोऽपि प्रवसन्नप्यमन्त्रितः ।
शूद्रोऽप्येवंविधः कुर्यादामान्नेन सदा नृपः ।।

इत्यादि नित्यतया विहितममावास्यादि श्राद्धम्। कर्णेषु मन्त्रोहं न कुर्यात् आमान्नेन कुर्यात्।

''आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते।

इति पक्वदोषाभिधानात्। एतेन शूद्रश्राद्धे पक्वान्नमन्त्रेतरसर्वेति-कर्त्तव्यतालाभः। ''एष एव'' इत्यत्र एतच्छब्देन सर्वेतिकर्त्तव्यता-परामर्शात्। न तु प्रथमाष्टकायाम् । वायुपुराणे -

''पितृवानापमूलेक्षुरष्टकासु''।

अष्टकामुपक्रम्य -

''आद्याऽपूपैः सदा कुर्यान्मांसैरन्या विधीयते।
शाकैः कार्या तृतीया स्यादेष द्रव्यगतो विधिः।।''[१७१]

इत्यपूपनियमात्। शूद्रस्यापूपाभावात् कथं तत्राधिकार इति चेत् एतद्वाक्यस्य एव द्रव्यनियमपरत्वात्। अन्यथा ''एतच्चानुपनीत'' इत्यस्य अष्टकादिश्राद्धादेः शूद्रकर्त्तव्यावश्यकतापरस्य विरोधापत्तेः। तस्मात् प्रथमाष्टकायामपि आमान्नेनैव शूद्राणामधिकारः।

मांसाष्टकायां तु आममांसस्य भक्षकत्वेन तद्धेयत्वात् तदतिक्रमेण तदनादरेणैव श्राद्धम् । द्रव्यनियमवाक्यस्य शूद्रातिरिक्तपरत्वा-दित्युक्तत्वात् । अत्र च -

''मुहूर्त्तात् सप्तमादूर्ध्वं मुहूर्त्तान्नवमादधः।''
''एकोद्दिष्टस्य कालोऽयम्......''

इत्यादि उक्तैकोद्दिष्टादि कालो ग्राह्यः। न तु -

''आमश्राद्धं तु पूर्वाह्णे''[१७२]

---

१७०. शूलपाणिः इति श्रा.प्र., पृ- १२७

१७१. वायुपुराणमिति श्रा.प्र., पृ- १६४

१७२. कृत्यकौ. पृ- २२६

इति वाक्यबलात् पूर्वाह्णः। एतद्वाक्यस्य कल्पतरुकारादिभिरलिखितत्वेन अप्रामाणिकत्वात् प्रामाणिकत्वे वाऽन्यस्य ब्राह्मणादेः पक्वानामश्राद्धयोः संभवः। तस्य प्रभावः सदिति मतं यत् काम्यश्राद्धं तत् पूर्वाह्णे कर्त्तव्यम्। आमश्राद्धं त्विति तु शब्दसारत्वात्। तत्रापि अमावास्याश्राद्धमामद्रव्येण चन्द्रक्षयानुरोधादपराह्णे कर्त्तव्यम्। अमावास्याशब्दस्य चन्द्रक्षयोपलक्षित इति कल्पतरुव्याख्यानात्।

कालादर्शकारस्तु शूद्राणामपि आमश्राद्धं पूर्वाह्णे एवेत्याहुः। यदा आमश्राद्धं कुर्यात् तदा आमान्नेनैव द्रव्येणाग्नौकरणं होमं कुर्यात्। तण्डुलचूर्णादिना च पिण्डं निष्पाद्य पिण्डनिर्वपणं कुर्यात्। तत्र चैषां द्रव्याणां तण्डुलमुद्गकदलीफलादीनामामत्वे भक्षणे न निषेधः। तेषामेवामश्राद्धे दानम्। मत्स्यमांसादीनां भक्षणप्रतिषेधादभक्ष्याणां च दानाभावात् न तेषां श्राद्धे दानम्। केषांचिद् दानसमाचारो निर्मूलः। एतेनाग्नौकरणहोमे घृताक्तान्नस्य साधकत्वविधानात्। अन्नपदस्य च ओदन एव उक्तत्वादनग्न्यभावाच्च शूद्राणां नाग्नौकरणहोम इति मतं निरस्तम्। आमान्ने अग्नौकरणहोमविधानात्। विप्रप्रमादादावनग्निक इति अनग्नेः विप्रप्रमादादावपि तद्विधानात्। न तु–

"प्रौष्ठपद्यामतीतायां प्राप्य कृष्णाचतुर्दशीम्।
श्राद्धं यत्नेन कर्त्तव्यं मधुना पायसेन च।।"

इति आश्विनकृष्णाचतुर्दश्यां विहितपायसश्राद्धे शूद्राणां नाधिकारः स्यात्। एतद्वाक्यस्य अनेकगुणविधानभेदेन विशिष्टविधिपरत्वात्। विशिष्टविधाने चार्थतः पायसनियमात्, पायसपदस्य च संस्कृतार्थकतद्धितबलेन पयःसाधितान्नपरत्वादिति चेन्न।

"यत्किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम्।
तदप्यक्षयमेव स्याद् वर्षासु च मघासु च।।"[१७३]

इति मनुवाक्ये मधुसंयुक्तं किञ्चिद् द्रव्यमात्रस्य त्रयोदशीश्राद्धविहितत्वेन पायसनियमे मानाभावात्। अत एव पितृगाथाः –

---

१७३. मनु. ३/२७३

पिता पितामहश्चैव तथैव प्रपितामहः ।
उपासते सुतं जातं शकुन्ता इव पिप्पलम् ।।[१७४]
मधुमांसैश्च शाकैश्च पयसा पायसेन च ।
एषो नो दास्यति श्राद्धं वर्षासु च मघासु च ।।[१७५]

इति पायसं मघायुक्तत्रयोदश्यां विकल्पेन भवतीति । तत्र शूद्राणां मृताहे एकोद्दिष्टनियमः । वाजसनेयिनां सर्वेषां पायस एकोद्दिष्टकल्पितत्वात् । शूद्रा वाजसनेयिन इति उपदेशात् ।

एकोद्दिष्टं तु शूद्राणां मृताहश्राद्धमिष्यते ।

एतद्वाक्यस्य मूलत्वेऽपि तथा करणे विरोधाभावाच्च । आश्विनापर-पक्षामावास्ययोः मृताहमात्रे तु–

अमावास्याक्षयो यस्य प्रेतपक्षे विशेषतः ।
पार्वणं तत्र कर्त्तव्यं नैकोद्दिष्टं कदाचन ।।[१७६]

इति वचनात् पार्वणमेव प्रेतपक्षाश्विनापरपक्षः । अमावास्याष्टकापर-पक्षादौ च पार्वणमेव । तत्र मातामहादि प्रवेशोऽपि ।

पितरो यत्र पूज्यन्ते आब्दिकेन विना नरैः ।
तत्र मातामहाः पूज्या एष धर्म सनातनः ।।

इति न्यायात् । शस्त्रहतानामाश्विनापरपक्षे चतुर्दश्यां यच्छ्राद्धं तदेकोद्दिष्टमेव ।

एकोद्दिष्टविधानेन दातव्यं शस्त्रघातिनः ।

अत्र शस्त्रघातयोगात् शस्त्रघातीति शस्त्रहत इति यावदिति कल्पतरु-व्याख्यानात् ।

अथ पद्धतिः

पूर्वदिने निरामिषैकभोजनं, श्राद्धदिने नद्यादौ गत्वा कृतस्नानः कृताह्निको यजमानः यथोक्तश्राद्धकालात्पूर्वं ब्राह्मणेभ्यो स्नानोपकरणं

---

१७४. वसिष्ठ. ११/३९, इति कृत्यकल्प. श्रा.का., पृ- १९

१७५. वसिष्ठ. ११/४०, इति कृत्यकल्प. श्रा.का., पृ- २०

१७६. श्रा.प्र., पृ- १९९

दन्तकाष्ठादि ब्राह्मणद्वारा प्रदद्यात् । स्वयं पुनरपि श्राद्धाङ्गस्नानं विधाय श्राद्धभूमिं पञ्चगव्येन उपलिप्य अङ्गारेण संशोध्य गौरमृत्तिकया समित्तिलसर्षपान् विकिरेत् ।

ततः श्राद्धद्रव्याणि यथासान्निध्येन श्राद्धगृहबहिरङ्गणभूमिं गोमयेनोपलिप्य तत्र पशव्यं गोमूत्रेण मण्डलं कुर्यात् । तत्र नम इति जलतिलपुष्पादिकं निक्षिपेत् । सगोत्रब्राह्मणेन वाऽऽहूतान् ब्राह्मणान् यथास्थानं निवेशयेत् । ततो ब्राह्मणानुज्ञया सङ्कल्पं कुर्यात् । देशकाल-वाक्यानन्तरममुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानाममुकामुकामुक-दासानाममावास्यादिविहितं पार्वणश्राद्धमहं कुर्वीयेति ।

पार्वणश्राद्धपक्षेऽपि अस्मत् पित अमुकदासस्य मृताहविहितं पार्वणश्राद्धमहं कुर्वीयेति सङ्कल्पः । तत्र दर्भेषु तिष्ठन् प्रथमं वैश्वदेवं ब्राह्मणं स्वागतमिति पृच्छेत् । स्वागतमिति ब्राह्मणेनोक्ते उदङ्मुखं ब्राह्मणमुपवेश्य स्वयमुपविशेत् प्राङ्मुखः । अद्य मया श्राद्धं कर्त्तव्यं तत्र वैश्वदेवकृत्ये भवन्तो मया निमन्त्रणीया इति ब्राह्मणस्य दक्षाङ्गुष्ठं धृत्वा वदेत् । निमन्त्रिताः स्म इति तेनोक्ते ।

अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः ।
भवितव्यं भवद्भिश्च मयाऽत्र श्राद्धकर्मणि।।[१७७]

इति नियमान् श्रावयेत् ।

ततो नम इदं वः पाद्यम् इति पादयोः जलदानम् । ताम्रपात्रस्य जले गन्धपुष्पाक्षतं पातयित्वा नम एष वः पादार्घ्य इत्यर्घ्यदानम् । नम इदं वः आचमनीयं दद्यात् । ततोऽपसव्यः दक्षिणाभिमुखोऽमावास्यादौ पितृपितामहप्रपितामहस्थाने एकैकं सर्वेषां स्थाने एकं वा ब्राह्मणं निमन्त्रयेत् । मातामह-प्रमातामह-वृद्धप्रमातामहस्थाने एकैकं ब्राह्मणं निमन्त्रयेत् । मृताहे च पित्रादिपंक्तौ एकमेव तत्र मातामहादीनामभावात् ।

तिलपुष्पमोटकानि गृहीत्वाऽपसव्यो दक्षिणामुखो अद्य मया श्राद्धं कर्त्तव्यम् । तत्रास्मत् पितृ-पितामह-प्रपितामहकृत्ये भवन्तो मया

१७७. मत्स्यपुराणे इति कृत्यकल्प.श्रा.का., पृ- १०५

निमन्त्रणीयाः, निमन्त्रिताः स्म इति प्रतिवचनम् । एवमस्मत् मातामह-प्रमातामह-वृद्धप्रमातामहस्थाने मया निमन्त्रणीया इति निमन्त्रिता इत्युक्ते इदं वः पाद्यम् । अर्घ्यपात्रेभ्य उदकतिलपुष्पाणि पातयित्वा एष वः पादार्घ्यः ।

एवमस्मन्मातामह-प्रमातामह-वृद्धप्रमातामहस्थाने मया निमन्त्रणीया इति निमन्त्रिताः स्म इत्युक्ते इदं वः पाद्यम् । अर्घ्यपात्रे मोटकतिलकुशगन्धपुष्पाणि पातयित्वा एषो वः पादार्घ्यः । एवमिदं व आचमनीयम् इति प्रत्येकं दद्यात् ।

ततो ब्राह्मणानग्रे विधाय श्राद्धदेशं गत्वा मण्डलकरणम् । दीपस्थापनम् । प्राङ्मुखतया वैश्वदेवब्राह्मणद्वयमासनम् । उदङ्मुखतया पितृपंक्तिब्राह्मणद्वयमासनम् । नमोऽत्रासध्वम् । अप्रदक्षिणतया तिलपुष्पसर्षपविकिरणम् । ततस्ताम्रपात्रे मोटकतिलगन्धपुष्पादीनि पातयित्वा–

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ।।[१७८]

इति पठित्वा ब्राह्मणेनास्मिन् मन्त्रे पठिते नम इति श्राद्धीयद्रव्याणि प्रोक्षयेत् । ततश्च नम इदं व आसनम् इति सर्वेषामासनपादासनादि दत्त्वा वैश्वदेवब्राह्मणं विश्वान् देवानावाहयिष्ये इति पृच्छेत् । तत आवाहयेत्युक्ते नमः कालसंज्ञका विश्वेदेवा अत्रागच्छत । अमावास्यादौ पुरुरवसंज्ञकविश्वेदेवाः मार्दवसंज्ञकविश्वेदेवा अत्रागच्छत । इत्यावाहनम् । एतेषां विशिष्टाज्ञा–

आगच्छन्तु महाभागा विश्वेदेवा वरप्रदाः ।
ये यत्र विहिता श्राद्धे सावधाना भवन्तु ते ।।[१७९]

इत्यावाहनं कुर्यात् ।

ततोऽपसव्यो दक्षिणाभिमुखः पितॄनावाहयिष्ये इति पृच्छेत् ।

---

१७८. श्राद्धकल्प., पृ- २०

१७९. श्राद्धकल्प., पृ- २१

ततो आवाहयेत्युक्ते नमोऽमुकसगोत्रास्मत् पिता अमुकदास अत्रागच्छ । एवं पितामह-प्रपितामहयोरावाहनम् । मातामहादीनां च ततो नमो इति पठेत् । ततो वैश्वदेवब्राह्मणाग्रेऽर्घ्यपात्रद्वयं स्थापयित्वा नम इति तत्र जलं पूरयित्वा नम इति गन्धपुष्पं च प्रक्षिप्य नमः पुरुरवसंज्ञका विश्वेदेवा नमो मार्दवसंज्ञका विश्वेदेवा इदं वोऽर्च्चनपुष्पं नम इति अर्च्चनपुष्पं दद्यात् । उपचारादावन्ते जलदानम् । सर्वत्र वैश्वदेवकृत्ये सव्यः । पितृकृत्ये अपसव्यः दक्षिणामुखपरः ।

ततः सव्यः प्राङ्मुखः अर्घ्यपात्रद्वयं स्थापयित्वा नम इति यवान् पातयित्वा नमोऽर्घ्येभ्योऽद्भ्य इति गन्धपुष्पे दत्त्वा पवित्रद्वयं ब्राह्मणहस्ते दत्त्वा अर्च्चनपुष्पं च ततो नमः पुरुरवसंज्ञका विश्वेदेवा, मार्दवसंज्ञका विश्वेदेवब्राह्मणौ नमः इत्यर्घ्यं दद्यात् ।

ततोऽपसव्यो दक्षिणामुखो मोटकद्वयं पातयित्वा एकस्मिन् अर्घ्यपात्रत्रयम्, अन्यत्र अर्घ्यपात्रत्रयमिति अर्घ्यपात्रपंक्तिद्वयं स्थापयित्वा नम इति सर्वत्र जलं पूरयित्वा तदुपरि प्रत्येकं सर्वत्र पवित्रद्वयं स्थापयित्वा नम इति सर्वत्र तिलान् विक्षिपेत् । नमोऽर्घ्येभ्योऽद्भ्य एष गन्ध इति गन्धं पुष्पं च दत्त्वा अमुकसगोत्रास्मत्पिता अमुकदास इदमर्च्चनपुष्पं नम इति प्रत्येकमर्च्चनपुष्पं सर्वेभ्यो दद्यात् ।

ततः पवित्रद्वयं ब्राह्मणकरे दद्यात् । नमोऽमुकसगोत्रास्मत्पिता अमुकदास एष तेऽर्घ्यं नमः । इत्यर्घ्यं दत्त्वा नम इत्युक्त्वा अर्घ्यशेषं पात्रान्तरे स्थापयेत् । एवं पितामह-प्रपितामहयोरर्घ्यं दत्त्वा सर्वान् संश्रवान् मूलपात्रे कृत्वा सव्यः प्राङ्मुखः नम इति अर्घ्यपात्रमालभ्य नम इति सव्यापसव्याभ्यामक्षिणी प्राङ्मृज्यात् । ततो नम इति पात्रं न्युब्जं कृत्वा ब्राह्मणसमीपे स्थापयेत् । एवं मातामहादीनामपि अर्घ्यदानम् । नम इति न्युब्जपात्रकरणम् । नमः पितर इदं ते पाद्यं नम इति नामगोत्रसहितं न्युब्जपात्रे उपचारान् दद्यात् । सर्वत्र ब्राह्मणोपचारात्पूर्वं न्युब्जपात्रे उपचारः ।

ततो विश्वेषां देवानां स्थाने गन्धादीनामुपचाराणां दानम् । ततो मोटकजलतिलान्यादाय नमोऽमुकसगोत्रास्मत्पिता अमुकदास एतानि

गन्धपुष्पधूपदीपसुवर्णरजतताम्रचैत्यकांस्यत्रपाच्छत्रोपानहकाष्ठपादुका-सोपकरण-शय्या-सुवर्ण-ग्रैवेयक-कुण्डल-ताम्बूल-यज्ञोपवीत-वासांसि ते नम इत्युत्सृजेत् । एवं पितामहादीनाम् । ब्राह्मणस्य कांस्यपात्रादि परिग्रहः ।

ततः श्राद्धस्थलसंस्कारः । श्राद्धद्रव्यस्य आमान्नत्वान्न तत्र स्थाल्युद्धरणं भवत्येव । अग्नौकरणार्थं घृताक्तशालितण्डुलग्रहणम् । अग्नौकरणं करिष्ये इति प्रश्नः । कुरुष्वेति पंक्तिर्मूर्द्धन्येनोक्ते ब्राह्मणहस्ते जले स्थण्डिले क्षितौ वा "अग्नये कव्यवाहनाय नमः"[१८०] इति दत्त्वा "सोमाय पितृमते नमः"[१८१] इति पुनर्दद्यात् ।

ततः सोपकरणं पूर्णपात्रं मधुना घृतेनाप्लाव्याधोमुखाभ्यां हस्ताभ्यां नम इत्यालभ्य इदमन्नमिति स्थाने आमः पठित्वा इदं विष्णवे नम इति पठन् ब्राह्मणाङ्गुष्ठं पात्रे संयोज्य अपहता इति स्थाने नम इति तिलान् विकीर्य यवपुष्पादिकं गृहीत्वा पुरुरवसंज्ञका विश्वेदेवा, मार्दवसंज्ञका विश्वेदेवा इदं सोपकरणमामान्नादिकं वो नम इत्युत्सृजेत् । एवं पित्रादि पात्रेऽपसव्यो दक्षिणाभिमुखो नम इति ब्राह्मणाङ्गुष्ठं करे संयोज्य अमुकसगोत्रा अस्मत् पितरोऽमुकदास एतत्ते सोपकरण-मामान्नादिकं नम इति प्रत्येकं पित्रादिभ्यो दद्यात् । इदमस्मत् पित्रे इति प्रत्येकं त्यागः । ततो नमो नमो नम इति जपित्वा ततः कुशेषूपविश्य पितृतीर्थेन तिलान् विकिरेत् ।

नमस्तुभ्यं विरूपाक्ष नमस्ते दिव्यचक्षुषे ।
नमः पिनाकहस्ताय नित्यमेव नमो नमः ।।

अयं मन्त्रो न प्रामाणिकलिखित इति सर्वेषां तत्र नादरः ।

सप्तव्याधा दशारण्ये मृगाः कालाञ्जिरे गिरौ ।
चक्रवाकाः शरद्द्वीपे हंसाः सरसमानसे ।।
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ।
प्रस्थिता दीर्घमध्वानं यूयं तेभ्योऽवसीदथ ।।

---

१८०. श्राद्धकल्प., पृ- २५
१८१. श्राद्धकल्प., पृ- २५

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ।।[१८२]

'मधु मधु' इत्यस्य स्थाने नमो नम इति पठेत् । रुचि रुचि रुचि इति केचित् । इदं मूलमिव । ततो देवताभ्य इत्यस्य त्रिजपः । ततो ब्राह्मणस्य भोज्यपरिग्रहः । आमत्वादेव भोजनाभावाच्चलुदानक्षेपणप्रश्नादेरभावः । ततो नमो नमो नम इति बहुवारं पठेत् ।

ततः कुशत्रयमास्तीर्य, ततो तिलोदकमभिषिच्य तिलोदकमाप्लावितं तण्डुलादिचूर्णं गृहीत्वा–

ये चास्मत्कुले पितरो लुप्तपिण्डोदकक्रियाः ।
ये चाप्यकृतचूडाश्च ये च गर्भाद् विनिःसृताः ।।
येषां दाहो न क्रियते येऽग्निदग्धास्तथाऽपरे ।
भूमौ दत्तेन चान्नेन तृप्ता यान्तु परां गतिम् ।।[१८३]

इति दद्यात् । इदमेतदिति त्यागः । भोजनाभावात् तृप्तिप्रश्नाभावः । देवताभ्य इति जपित्वा ततो नमो नम इति पठेत् । पिण्डानावपामि इत्येवं प्रश्नः । पात्रपरिवेषणाभावे नान्नशेषस्याभावः । आवपेत्यनुज्ञाते चतुरोऽङ्गुलोच्छ्रितां हस्तमात्रां दक्षिणप्रवणां गोमृत्तिकाया अभावे कुर्यात् । ततश्च कुशमोटकयुक्तेन दक्षिणहस्तेन सव्यार्थोदकषेचनम् ।

निहन्मि सर्वं यदमेध्यभूतं हताश्च सर्वेऽसुरदानवाश्च ।
यक्षाश्च रक्षांसि पिशाचसंघा हता मया यातुधानाश्च सर्वे ।।[१८४]

इति मन्त्रेण नम इति मन्त्रेण वा वेदिपरिशोधनमपसव्यतया कुर्यात् ।

कुशैकमुदकपात्रं सकृदाच्छिन्नकुशाः । व्रीहयः सूत्राणीत्यासादयेत् । नम इति कुशेन रेखाकरणम् । नम इति वेद्यग्रे उल्मुकस्थापनम् । उदकस्पर्शनम् । नमोऽमुकसगोत्रास्मत् पितरोऽमुकदास उज्ज्वलं तुभ्यमस्तु नमोऽवनेनिक्ष्वेत्यवनेजनम् । एवं पितामह-प्रपितामहयोश्च पङ्क्तौ

---

१८२. आ.श्रा.प., पृ- ५२

१८३. आ.श्रा.प., पृ- ५४

१८४. आ.श्रा.प., पृ- ५५

मातामहादीनां ततः पङ्क्तिद्वये द्विधा कुशास्तरणम् । अन्तरा कुशदानम् । कुशाग्रे स्थानकल्पना । गन्धपुष्पप्रक्षेपः ।

ततश्चूर्णपायसादिकृतं पिण्डं घृततिलमधुसंयुक्तं बिल्वफलोपमं निर्माय मधुघृताभ्यामभिधार्य वामानारब्धं दक्षिणहस्तेन पिण्डं गृहीत्वा नमोऽमुकसगोत्रास्मत् पितरोऽमुकदास एष ते पिण्डो नम इति पिण्डं दद्यात् । इदमस्मत् पितरिति त्यागः ।

लेपभुजां तृप्त्यर्थं कुशतिलसहितं जलं दद्यात् । नम इति जपेत् । आवृत्या तमितरे आसनम् । नीवीश्रंसनम् । पुनः तेनैव प्रत्यागमनम् । ब्राह्मणमुखं दृष्ट्वा नम इति जपेत् । नमोऽमुकसगोत्राऽस्मत्पितरोऽमुकदासी तज्जलं तुभ्यमस्तु नमोऽवनेनिक्ष्व इति प्रत्यवनेजनम् । ततो नमो नमो नम इति षडजंलिकरणम् । नमोऽमुकसगोत्रास्मत्पितरमुकदास एतद्वासस्तेभ्यो नम इति क्रमेण प्रतिपिण्डं सूत्रदानम् ।

ततो "एते वै पितरो देवा"[१८५] इति स्थाने नम इति मन्त्रं पठन् पिण्डेषु पित्रादीनां प्रत्येकं गन्धादिभिः पूजा । नमोऽमुकसगोत्रास्मत् पितृपितामह-प्रपितामहामुकामुकामुकदासा, अमुकसगोत्रास्मत् मातामह-प्रमातामह-वृद्धप्रमातामहा अमुकामुकामुकदासा इदं पिण्डबलित्वेनोपकल्पितं वो नम इति दद्यात् । ततश्च नम इति प्रतिपिण्डं स्पृशेत् ।

वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः ।
वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमः सदा ।।
हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ।
माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः ।।
स्तोतव्या चेह पृथिवी निवाप शतधारिणी ।
वैष्णवी काश्यपी चैव तथैवेक्ष्वाकवीति च ।।[१८६]

इति पठेत् । नम इति पिण्डोपरि जलं सिञ्चेत् । पिण्डान् स्थानान्तरे स्थापयित्वाऽऽजिघ्रेत् । उल्मुकानामग्नौ प्रक्षेपः ।

---

१८५. श्रा.प्र., पृ- ३

१८६. श्रा.क., पृ- ३३, वायुपुराणमिति श्राद्धकल्पतरु., पृ- २१८
आ.श्रा.प., पृ- ९४

ततः स्वागतान् ब्राह्मणान् स्वस्थाने वासयित्वा "अपां मध्ये"[१८७] इति सर्वेषां हस्ते जलं दद्यात् । ब्राह्मणस्य तु इत्यत्र प्रतिवचनम् । "पुष्पेषु वसते लक्ष्मी"[१८८]रिति सर्वेषां हस्ते पुष्पदानम् । अस्तु सदेति प्रतिवचनम् । "अक्षतं चास्तु मे पुण्य"[१८९]मिति सर्वेषां हस्ते अक्षतदानम् । ततः कुशमोटकतिलादीनामपि नमोऽमुकसगोत्रास्मत् पितरमुकदासस्य यद्दत्तमन्नमुदकादिकमक्षय्यमस्त्विति वदन् घृतं मधुना किञ्चिदुत्पादयेत् । ततः सव्यो पूर्वाभिमुखोऽघोराः पितरो न सन्त्विति ब्रूयात् । सन्त्विति ब्राह्मणाः । गोत्रं नो वर्धताम् । वर्धतामिति ब्राह्मणाः ।

दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च ।
श्रद्धा च नो मा व्यपगमत बहुधेयं च नोऽस्तु ।।
अन्नं च नो बहु भवेदतिथींश्च लभेमहि ।
याचितारश्च नः सन्तु मा च याचिस्म कञ्चन ।।[१९०]

एता वै आशिषः सत्याः सन्त्विति ब्राह्मणाः ।

सपवित्रान् कुशानास्तीर्य नमो वाचयिष्ये इति ब्राह्मणान् पृच्छेत् । वाच्यतामिति उक्ते पित्रे नम इत्युच्यतामित्यस्तु नम इति ब्राह्मणः । पितामहाय नम इत्युच्यतामिति उक्ते पितामहायास्तु नम इति । नमो वाचनक्रमः ।

ततो न्युब्जपात्रमुत्निकृत्य कृतैतत् श्राद्धकर्मणः सुप्रतिष्ठार्थं विश्वेषां देवानां स्थाने नियुक्ताय ब्राह्मणाय हिरण्यं पित्रादि-स्थाने नियुक्ताय ब्राह्मणाय रजतं दद्यात् । ततो ब्राह्मणाङ्गुष्ठं गृहीत्वा नम इति उत्थापयेत् । ततो ब्राह्मणं वारिधारया वेष्टयेत् । अष्टपदान् प्रव्रज्य प्रियवचनानि त्यक्त्वा नम इति विसृजेत् । अच्छिद्रावधारणम् ।

---

१८७. आ.श्रा.प., पृ- ९५

१८८. आ.श्रा.प., पृ- ९५

१८९. आ.श्रा.प., पृ- ९५

१९०. आ.श्रा.प., पृ- ९६

आयुः प्रजा धनं विद्यां स्वर्ग मोक्षं सुखानि च ।

प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः ।।[१११] इति ।

आयुष्मान् धनवान् सुखी भवेति ब्राह्मणानामाशीर्वादनम् । पाणिना दीपनिर्वापः । दीनानाथब्राह्मणभोजनम् । नम इति श्राद्धशेषभक्षणम् । एतादृशश्राद्धकरणाशक्तौ सङ्कल्पश्राद्धम् । अत्र च निमन्त्रणाभावः केवलं ब्राह्मणं वासयित्वा तमासनादिभिरुपचारैः पूजयित्वा पूर्वोक्तमन्त्रेण पित्रादिभ्योऽन्नोत्सर्गः । पिण्डदानाद्याशीर्वादान्ताभावश्च । तथा हि–

अङ्गानि पितृयज्ञस्य यदा कर्त्तुं न शक्नुयात् ।

सङ्कल्पश्राद्धमेवासौ कुर्यादर्घ्यादिवर्जितम् ।।[११२] इति ।

एकोद्दिष्टे च विश्वेषां देवानामभावः । नावाहनम् । नाग्नौकरणम् । एकं पवित्रं द्व्यरूपं पित्रालम्भननिषेधस्य प्रेतैकोद्दिष्टविषयत्वात् । भोजनाभावादन्नस्वदितमिति प्रश्नः । अभिरम्यतामिति विसर्गः । एतावान् विशेषोऽवधारणीयः ।

सर्वत्र वैदिकपौराणिकमन्त्रा ब्राह्मणेन पठनीयाः । पाठकाले नमः पदोच्चारणमिति गौडाः । अत्र श्राद्धीयद्रव्याणि यवगोधूमधान्यतिलमुद्गानि फलानि मूलानि च वायुपुराणोक्तानि श्राद्धीयत्वेन ग्राह्याणि । अत्र च स्वादूनि मधुराणि चेति स्वादमधुराणामेव श्राद्धीयत्वेन नियमात् । अन्येषामस्वादमधुराणां तु निवृत्तिः ।

पितृभ्यश्चापि तद्वत् स्यान्महानन्त्याय कल्प्यतः ।

इति फलश्रवणात् ।

पितृभ्यो दीयते यत्तु विष्णुनैवेद्यवर्जितम् ।

पितरस्तं न गृह्णन्ति निःश्वासं पातयन्ति च ।।

इति विष्णुनैवेद्यदाने दोषश्रवणाच्च । पक्वानामेव उच्छिष्टदोषाभिधानात् । लवणं विना घृतपक्वानि शूद्रेण श्राद्धे देयानि । तथा पायसमपि । तस्यापि लवणोदकेन पक्वत्वात् ।

---

१११. या.स्मृ. १/२७०

११२. स्मृति इति श्रा.प्र., पृ– ७४

....................पायसं दधिसक्तवः ।
एतानि शूद्रान्नभुजो ग्राह्याणि मनुरब्रवीत् ।।

इति शूद्रीयस्यापि पायसस्य मनुना ग्राह्यत्वेनाभिधानाच्चेति ।

अत एवापूपाष्टकायां पायसं, मघाश्राद्धे च तेषामधिकारः । इति चैकदेशिनः । तत् आचारविरोधात् अतिप्रसङ्गाभावाच्च नादरणीयम् । मनुवाक्ये च पायसपदं पाठिनीभृत्क्षारपरम् । न तु परमान्नपरमिति मेधातिथिः । मृताहदिवसे अशौचपातेऽशौचान्ते मृताहश्राद्धम् ।

देये पितॄणां श्राद्धे तु यद्यशौचं प्रजायते ।
तदाशौचव्यतीते तु तेषां श्राद्धं विधीयते ।।
शुचिभूतेन दातव्यं या तिथिः प्रतिपद्यते ।
सा तिथिस्तस्य कर्त्तव्या न त्वन्या वै कदाचन ।।

इति ऋष्यशृङ्गस्मरणात् । अत्र श्राद्धपदस्य मृताहविहितश्राद्धपरत्वेन शुद्धिगुच्छव्याख्यानात् । मासिकवार्षिकश्राद्धानामन्येषां प्रेतसंस्कारकत्वेन विहितानां श्राद्धानामशौचान्तेऽनुष्ठानम् । अमावास्याष्टकादावशौचपाते तेषां लोप एवेति दिक् ।

दीपदानम्

तुलास्थे भास्करे दर्शे उपास्तसमये रवौ ।
एकैकस्य पितुस्त्रींस्त्रीन् प्रदद्यात् पितृयज्ञवत् ।।[१९३]

इति वचनाद् यस्मिन्नुपास्तसमयेऽमावास्या तदानीं दीपदानं कुर्यात् । नात्र चन्द्रक्षयापेक्षा । भविष्ये दीपान्वितेन पञ्चदश्यामेवोपादानात् ।

येयं दीपान्विता राजन् ख्याता पञ्चदशी भुवि ।

इति वचनाद् गृहाद् बहिरङ्गणे गोमयेन भूमिमुपलिप्य तण्डुलचूर्णेन चतुरस्त्रमण्डलं कृत्वा पूर्वस्यां दिशि दशकोष्ठयः । उत्तरस्यां दिशि सप्तकोष्ठयः । दक्षिणस्यां नवकोष्ठयः नियताः । तत्र पूर्वभागे प्रतिकोष्ठि प्रागग्रं कुशस्थापनम् । उत्तरेषु उदकाग्रकुशद्वयस्थापनम् ।

---

१९३. परिशिष्ट इति कृत्यकौमुदी., पृ- १२३

तत्र पूर्वोत्तरकोष्ठिषु यवश्यामलपुष्पादिप्रक्षेपः । दक्षिणपार्श्वे तिलश्यामलादिप्रक्षेपः । ततस्ताम्रपात्रे जलं पूरयित्वा तत्र गन्धपुष्पतिलमोटकादीनि प्रक्षिप्य विष्णुं स्मृत्वा नम इति उच्चार्य सकृत् सर्वोपकरणद्रव्यं प्रोक्षयेत् ।

ततः सङ्कल्पः । ताम्रपात्रे जलगन्धादिकं प्रक्षिप्य हस्ताभ्यां गृहीत्वा देशकालवाक्यानन्तरमपसव्यो दक्षिणामुखोऽद्य कार्त्तिकामावास्यायामुपास्तसमये रवौ ज्योतिर्लोकप्राप्तिकामाऽमुकसगोत्राणामस्मत् पितृपितामहप्रपितामहानाममुकामुकामुकदासानाम् अमुकसगोत्राणामस्मत् मातामह-प्रमातामह-वृद्धप्रमातामहानाम् अमुकामुकामुकदासानाममुकसगोत्राणामस्मत् मातृपितामहीप्रपितामहीनाममुकामुकामुकदासीनां क्रत्वादि दश विश्वेदेवाः सनकादिसप्तमनुष्यसहितानां दीपदानमहं करिष्ये ।

पुनस्ततः पुष्पाक्षतं गृहीत्वा पूर्वकोष्ठ्यादिषु दक्षिणोत्तरं प्रति । नमः क्रतोऽत्रागच्छ । नमः कामोऽत्रागच्छ । नमो धूरोऽत्रागच्छ । नमो रोचनोऽत्रागच्छ । नमो पुरुरवोऽत्रागच्छ । इति दशविश्वेदेवानावाह्य नमः क्रतु एषो गन्धो नमः । नमः क्रतु इदं श्यामलतापुष्पं नमः इति क्रमेण दीपदानं कृत्वा एवमुत्तरकोष्ठिषु पश्चिमत उत्तरं प्रति प्रतिकोष्ठी नमः सनकाद्या अत्रागच्छतेत्यादिक्रमेणासनादीन् सप्त । नमः सनकैष ते गन्धो नमः । सनक इदं ते पुष्पं नमः । इति दीपान्तं दद्यात् ।

ततः पश्चिमतः पूर्वं प्रति दक्षिणकोष्ठिषु नमोऽमुकसगोत्रास्मत् पितरमुकदेव अत्रागच्छ इत्यादि क्रमेण । पितामह-प्रपितामहौ मातामह-प्रमातामह-वृद्धप्रमातामहान्, मातृपितामही-प्रपितामहींश्चावाह्य नमोऽमुकसगोत्रास्मत् पितरमुकदास एष ते गन्ध इति गन्धादिदीपान्तं सर्वेभ्यो दद्यात् । ततो नमः क्रतु एष ते दीपं प्रत्येकमेकं विश्वेभ्यः देवेभ्यः दद्यात् । ततो नमः सनक एतौ दीपाविति सनकादिभ्यः प्रत्येकं द्वौ द्वौ दीपौ दद्यात् ।

ततो नमोऽमुकसगोत्रास्मत् पितरमुकदास एष ते दीप इति

पित्रादिभ्यः प्रत्येकं त्रीन् त्रीन् दीपान् दद्यात् । कनिष्ठमातृपितृव्यादिभ्य-श्चावाहनमन्त्रेण समाचारादमुकसगोत्रास्मत् कनिष्ठमातरमुका दासी एष ते दीप इति दीपं दद्यात् । अत्र आर्द्रक-नारिकेल-इक्षु-क्रमुक-कपर्दक-श्यामलतापुष्पादीन् सर्वत्र सव्यो निवीती तथाऽपसव्यतया च समर्पयेत् । ब्राह्मणभोजनमच्छिद्रावधारणम् ।

अस्त्रशस्त्रहतानां च भूतानां भूतदर्शिनाम् ।
उज्ज्वलं ज्योतिषां देहं दहेयं व्योमवर्त्तिना ।।[१९४]

इति मन्त्रेण उज्ज्वलप्रदर्शनमाकाशे । ततो विष्णुस्मरणमाचमनम् इति ।

जन्ममरणयोरशौचम्

मनुः[१९५]–

शुद्ध्येद् विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ।।

मासपदं सावनमासपरम् । ततश्च याज्ञवल्क्यः[१९६]–

त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायवर्त्तिनः ।

इति न्यायवर्त्तिनः श्रद्धया द्विजशुश्रूषया वैश्यवृत्त्या च जीवतः । वैश्यवृत्त्याऽजीवने वैश्यवदाशौचम् । तत्र[१९७]–

जाते पुत्रे पितुः स्नानं सचेलं तु विधीयते ।

ब्रह्मपुराणे[१९८]–

सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः ।
कृत्वा सचेलं स्नानं तु शुद्धो भवति तत्क्षणात् ।।

इदं तु पुत्रमुखदर्शनानन्तरं स्नातस्य पितुः शुद्ध्यभिधानात् । तत्काल-

---

१९४. ब्राह्मे इति कृत्यकौ., पृ- १२३
१९५. मनु. ५/८३
१९६. या.स्मृ. ३/२२
१९७. संवर्त्त इति गदाधरः. का.सा., पृ- २२९
१९८. सुमन्तु इति का.सा., पृ- २२९

विहितसातिलहिरण्यपात्रगोभूमिहिरण्यादिदानानि । तदन्यत्र पुनश्शुद्धिस्तदवस्थैव । सूतके तु सूतिकां विना अङ्गाशौचाभावः ।

सूतके सूतिकावर्ज्यमङ्गस्पर्शो न दुष्यति ।[१९९]

इति वचनात् पुनरपि सूतिकायाः स्वपत्न्याः स्पर्शे दशरात्रमस्पृश्यत्वम् ।

यदि पत्न्यां प्रसूतायां नरः सम्पर्कमृच्छति ।
सूतकं तु भवेत्तस्य यदि विप्रः षडङ्गवित् ।।[२००]

इत्यनेन षडङ्गविदोऽपि ब्राह्मणस्य सूतिकास्पर्शे दशरात्रपर्यन्तमत्राशौचम्। सूतकपदेन सर्वविधानात् । सूतिकाया यद्दशरात्रादूर्ध्वमस्पृश्यत्वम् ।

सूतिका सर्ववर्णानां दशाहेन विशुद्ध्यति ।[२०१]

इति वचनात् । यत्तु-

ब्राह्मणी क्षत्रिया वैश्या प्रसूता दशभिर्दिनैः ।
शतैः शूद्राच्च संस्पर्शात् त्रयोदशभिरेव च ।।[२०२]

इति शूद्रयोश्च शतदिनानन्तरमेव कर्मार्हत्वम् । त्रयोदशदिनानन्तरं च स्पृश्यत्वम् । तत्र अनुपनीतविषयम् । शूद्रायाः शतदिनानन्तरकर्मार्हत्वाभिधानं मासाशौचपक्षे 'सूतिका सर्ववर्णानाम्'[२०३] इति सार्ववर्णिकदशरात्राशौचपक्षे इति शुद्धिविवेकः । वचनयोर्विरोधे व्यवस्थाया अयुक्तत्वात् । कर्मार्हत्वं च पुत्रजनन्या विंशतिदिनानन्तरम् ।

स्त्रीजनन्याश्च मासान्तम् । "सूतिकां पुत्रजननीं विंशतिरात्रेण स्नापयित्वा सर्वकर्माणि कारयेत् । मासेन स्त्रीजननीम्"[२०४] इति पैठीनसिस्मरणात् । यमजतया च पुत्रकन्ययोः जनने प्रथमतः यज्जन्म स्त्रियाः पुंसो वा तज्जन्मनैव मातुरशौचम् । प्रथमस्यैव प्रयुक्तत्वात् ।

---

१९९. अङ्गिरा इति का.सा., पृ- २३४
२००. का.सा., पृ- २३४
२०१. का.सा., पृ- २४२
२०२. ब्राह्मे इति का.सा., पृ- २४२
२०३. का.सा., पृ- २४२
२०४. पैठीनसि इति मिता., पृ- ३३६

द्वितीयः तदनुबन्धत्वेन पृथगशौचे प्रयोजकत्वाभावात् । द्वयोरप्येकसंप्रयोगजन्यशुक्राशौचार्थत्वेनैकत्वाच्च । मरणाशौचे तु शूद्राणां दशाहपर्यन्तमङ्गाशौचम् ।

दशमेऽहनि शूद्रस्य कार्यं च स्पर्शनं बुधैः ।

इति वचनात् । इदं च मासाशौचपक्षे ।

'तदर्धं न्यायवर्त्तिनाम्'[२०५] इति ।

पञ्चदशदिनपक्षे तु–

सप्तमेऽहनि वैश्यस्य विज्ञेयं स्पर्शनं बुधैः ।

इति वचनात् सप्तमाहपर्यन्तम् । एष एव पञ्चदिनस्य व्यवस्था अत्र सपिण्डानां सम्पूर्णाशौचम् । सकुल्यानां त्र्यहाशौचम् । गोत्रजानां तु स्नानमात्रम् ।

दशाहेन सपिण्डास्तु शुद्ध्यन्ति मृतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुद्ध्यन्ति गोत्रजाः ।।[२०६]

इति बृहस्पतिवचनात् । अत्र च दशाहपदं स्वजात्युक्ताशौचपरम् । शूद्रस्य तु दाहो ब्राह्मणेन न कर्त्तव्यः ।

ब्राह्मणो न दहेच्छूद्रं मित्रं वाऽप्यन्यमेव वा ।
मोहाद् दग्ध्वा ततः स्नातः स्पृष्ट्वाऽग्निं प्राशयेद् घृतम् ।।
उपवासरतः पश्चात् त्रिरात्रेण विशुद्ध्यति ।।[२०७]

इति शूद्रदाहे ब्राह्मणस्य प्रायश्चित्तविधानात् ।

विप्रैर्दग्धाश्च ये शूद्राः गतिं तेषां व्रजाम्यहम् ।।[२०८]

इति जैमिनीयरामायणे भरतवाक्येन शूद्राणां दोषविधानात् ।

एवं मासाशौचपक्षे दशमेऽहनि संचयनम् । पूरकपिण्डदानं च विंशतिदिनादारभ्य त्रिंशद्दिनपर्यन्तम् ।

शूद्राणां दशमपिण्डौ मासे पूर्णे विधानात् ।

---

२०५. या.स्मृ., ३/२२

२०६. बृहस्पति इति का.सा., पृ- २१४

२०७. का.सा., पृ- २६४

२०८. का.सा., पृ- २६४

इति स्मरणात् । एकादशाहश्राद्धं शौचापगमे एकत्रिंशत्तमदिने एव। अशौचापगमे एव विष्णुना एकादशाहश्राद्धविधानात् । विष्णुपुराणेऽपि सत्रोदिसूतकस्यान्त इत्यशौचान्त एव तद्विधानात् । अत एव–

मृतेऽहनि तु कर्त्तव्यं प्रतिमासं तु वत्सरम् ।
प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ।।[२०९]

इति याज्ञवल्क्यवचने एकादशाहपदमशौचान्तसंलक्षणार्थमिति कल्पतरुकारव्याख्यानम् । तत्तु–

सर्वेषामेव वर्णानामशौचं तु पृथक् पृथक् ।
साधारणं तु सर्वेषामाद्यमेकादशेऽहनि ।।

इति वचनात् । एकादशाहरूपमुख्यकालानुरोधेन एकादशाह एव तत् कर्त्तव्यम् ।

आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि ।
कर्त्तुः तात्कालिकी शुद्धिरशुद्धिः पुनरेव सः ।।[२१०]

इति वचनात् । तदयुक्तम् ।

ननु एकादशाहदिनपर्यन्तापेक्षेति कामधेनुरिति संक्षेपः ।

मरणाशौचे विशेषः पद्मपुराणे[२११]–

विप्रश्चानुपनीतस्तु राजा चैवाधनुर्धरः ।
अगृहीतप्रतोदस्तु वैश्यः शूद्रस्त्ववस्त्रधृक् ।।
म्रियते यत्र तत्र स्यादशौचं त्र्यहमेव च ।
द्विजन्मनामयं कालः त्रयाणां च षडाब्दिकः ।।
पञ्चाब्दिकस्तु शूद्राणां स्वजात्युक्तमतः परम् ।।

अङ्गिराः–शूद्रस्त्रिवर्षन्यूने तु मृते शुद्धिस्तु पञ्चभिः ।
षड्वर्षोर्ध्वमृते शूद्रे द्वादशाह विधीयते ।।
षड्वर्षान्तमतीतस्तु शूद्रः संम्रियते यदि ।
मासिकं तु भवेच्छुद्धिमित्याङ्गिरसभाषितम् ।।

---

२०९. या.स्मृ. १/२५६

२१०. शंख इति का.सा., पृ- २२०

२११. ब्राह्मे इति का.सा., पृ- २४५

शङ्खः[२१२]–

अनूढभार्यः शूद्रस्तु षोडशाद् वत्सरात् परम् ।
मृत्युं समधिगच्छेच्चेन्मासं तस्यापि बान्धवाः ।।
शुद्धिं समधिगच्छन्ति नात्र कार्या विचारणा ।।

अन्ते इयं व्यवस्था शूद्राणां सप्तममासात् प्राक् सद्यःशौचम् । सप्तममासादारभ्य तृतीयवर्षसमाप्तिं यावत् पञ्चाहं, तृतीयवर्षादारभ्य षोडशवर्षपर्यन्तं विवाहितमृते द्वादशाहं, तदुपरि अविवाहिते तु षष्ठवर्षादेवोपरि मृते सम्पूर्णाशौचम् । तथा च संवर्त्तः[२१३]–

दशाहमेवाशौचं तु सर्वेषामपरे विदुः ।
प्रसवे निधने चैव पश्यन्त कर्मणां क्षयम् ।। इति ।

तत्र च दशरात्राशौचपक्षे ह्यविवाहात्पूर्वं मरणे अङ्गिरावचनेनैवं व्यवस्था । शुद्धिचन्द्रिकाकारस्तु[२१४]–

सर्वे वा दशरात्रतोऽपि शुचयः ।

इति सर्ववर्णानां दशरात्राशौचमुक्तम् । सर्वसाधारण्येनैव गर्भस्त्रावान्तर्दशाहबालकबालिकामरणादशौचमुक्तवान् । एवम्–

गर्भाधानादिसंस्काराः शूद्राणां मन्त्रवर्जिताः ।
प्रागुपनयनात् कार्या विवाहस्य द्विजातिवत् ।।इति ।
शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः ।
न केनचित् समसृजत् कर्मणा तं प्रजापतिः ।।

इति विना मन्त्रेणेत्यत्र हेतुना केनचिदिति च्छन्दसः वेदस्य संस्पृष्टत्वात् गर्भाधानादौ क्रियामात्रता तदङ्गतया नान्दीमुखश्राद्धे कर्त्तव्यम् । वृद्धिश्राद्धं च सर्वदेति मत्स्यपुराणात् ।

वृद्धिश्राद्धपदं सनान्दीमुखपरतया व्याख्यानात् । अत्राऽपि नमःशब्देन सर्वेतिकर्त्तव्यता पूर्ववत् । तदङ्गतया नमो गौर्य्यै नमः इत्यादि क्रमेण मातृपूजाऽपि भवति । नमः शब्देन वसोर्धारा- आयुष्यमन्त्रजपयो-

२१२. शंख., १५/६-७
२१३. का.सा., पृ- २४२
२१४. शुद्धि., श्लो-३

बाँधः । न त्वत्र नमःपदोच्चारणम् । आयुष्यमन्त्र मन्त्रकार्यस्यान्ते स्तेनार्जनात् । ब्राह्मणैः वा पठनीयम् । यत्र तु संस्कारकर्मणि स्थालीपाकादि होमकर्म तद्ब्राह्मणद्वारा कर्त्तव्यम् । स्थालीपाकस्थाने वाऽऽज्यहोमः । शूद्रस्य पाकाभावात् ।

ब्राह्मणेन पाककरणेऽपि शूद्रस्य तत्र स्वामित्वात् 'पक्वमुच्छिष्ट-मिति' अस्य शूद्रस्वामिपक्वान्नपरत्वात् । अत्रामुकदासाः सीमन्तोन्नय-नाङ्गहोमकर्मणि आचार्यत्वेन त्वामहं वृणे इत्याचार्यब्राह्मणं च कृत्वा कर्त्तव्यमिति वाऽभिमन्त्रणादि श्रौतमन्त्रस्थले च नमःपदमेव पठनीयम् ।

'अनुज्ञातोऽस्य नमस्कारो मन्त्रः ।'[२१५]

इति गौतमवचनात् ।

एवं जातकर्मणि आयुष्यमन्त्रकरणे बहुवारपठित-नमःशब्देन ब्राह्मणेन वा मन्त्रः पठनीयः । एवं कालातिपातेऽनादेशप्रायश्चित्तं ब्राह्मणद्वारा कर्त्तव्यम् । यजमाने पादमात्रं स्वकालाकरणसमाधानार्थं हिरण्यादिदानं वा । नामकरणे तु 'शूद्रस्य प्रेष्यसंयुतमि'ति[२१६] मनुवचनात् । तथा नाम कार्यं यथा प्रेष्यपरं स्यादिति । अन्नप्राशनमपि ब्राह्मणद्वारा तत्र प्राणेनान्नमश्नीय स्वाहेत्यादि होम आश्विनकुमारस्य प्राणार्थं च स्थालीपाक इति विवेकः ।

तत्रादित्यागममात्रं यजमानस्य न । न तु शाखायाः प्रवरण-स्मरणार्थत्वात् शूद्राणां न जपकरणम् । अत एव 'वासयत केशवं चेति गौतम इति चेन्न । विशिखोऽप्युपवीतस्य किल तत् कृतमिति शाखायाः सर्वकर्मार्थत्वात् तत्राभावे च तद्वैगुण्यप्रसङ्गात् 'नोपवीतं बिभृयात् वस्त्रमस्योपवीतार्थं' इति उपवीतनिषेधात् अनियतकेशस्य तदनन्तरमपि सम्भवाच्च ।

उपनयनं तु न शूद्रस्य, तस्य वेदाध्ययनाभावात् । उपनयनस्य कन्याप्रतिग्रहरूपत्वात् शूद्रस्य प्रतिग्रहेऽधिकाराभावात् कथं शूद्रस्य विवाहे अधिकार इति चेत्–

'विवाहमात्रं संस्कारं शूद्रोऽपि लभतां सदा ।'

---

२१५. गौ.ध.सू. २/१/६६

इति ब्रह्मपुराणवचनेन प्राप्तविवाहविधानात् । विवाहे च वस्त्राभिमन्त्रणादि नमःशब्देनैव । एवमर्घ्यकरणपक्षेऽपि श्रौतमन्त्रस्थाने नमः । कन्याप्रतिग्रहदशायां तु–

'कन्यावस्त्रं दशासूत्रेण ग्राह्या न तु पाणिदशाग्राह्या तु शूद्रेण ।'

इति स्मरणात् ।

जयाहोमादिकं तु ब्राह्मणद्वारा । साप्तपदीकरणमपि आपदेनैव । विवाहे च शूद्राणां न स्वस्य गोत्रादि परिहारनियमः ।

'असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ।।'[२१७]

इति द्विजातीनामेव तत् परिहारविधानात् । अत एव बौधायनेनोक्तम्–

'असमानार्षगोत्रजामि'ति ।

त्रैवर्णिकमिति । परं तु रेतसः ब्राह्मणनारीषु तद्योनिष्वन्त्यजासु चेति 'स्वस्य योनिः कारणं योनिः कारणं यस्य' इति व्युत्पत्त्या साक्षात्परम्परात्वात् वा तत् परिहारः कर्त्तव्य इति अनवद्यम् । इति ।

इति दामोदरपट्टनायकसुत-गोपीनाथपट्टनायककृता
शूद्राह्निकपद्धतिः समाप्ता ।

—o—

---

२१६. मनु. २/३२
२१७. मनु. ३/५

परिशिष्टम्

(क) प्रमाणवाक्यसूची

श्लोकांशा:			पृष्ठांका:
अक्रोधनैः	–	–	५१
अक्षतं	–	–	५७
अग्निचित्	–	–	३५
अग्नित्रयं	–	–	१४
अङ्गहीना	–	–	२
अङ्गानि	–	–	५८
अत्यन्त	–	–	२५
अद्भिः	–	–	१८
अन्तर्जानु	–	–	१८
अन्नं च	–	–	५७
अन्नं दृष्ट्वा	–	–	४५
अनुज्ञातो	–	–	३,५,८,९,६६
अनूढभार्यः	–	–	६५
अन्नेन	–	–	४५
अपवित्र	–	–	२०
अपामार्ग	–	–	२२
अपां मध्ये	–	–	५७
अब्तिलैः	–	–	४१
अभ्यङ्गस्नान	–	–	३६
अभ्युद्धृतैः	–	–	१६
अमन्त्रस्य	–	–	४
अमावास्या	–	–	५०

श्लोकांशाः			पृष्ठांकाः
अयज्ञीयैः	–	–	१५
अयाचित	–	–	६
अलाभे	–	–	२१
अश्वक्रान्ते	–	–	२७
अष्टाङ्गुला	–	–	१७
अष्टाङ्गुलेन	–	–	२२
असपिण्डा	–	–	६७
असमाना	–	–	६७
अस्त्रशस्त्र	–	–	६१
अहिंसा	–	–	११
आगच्छन्तु	–	–	५२
आचान्तः	–	–	२८
आचमना	–	–	९
आद्यं श्राद्ध	–	–	६४
आद्यापूपैः	–	–	४८
आब्रह्म	–	–	३९
आमश्राद्धं	–	–	४७,४८
आमं शूद्रस्य	–	–	४८
आयुः प्रजा	–	–	५८
आयुर्बलं	–	–	२१
आयुष्यं	–	–	४२
आस्तिक्य	–	–	४६
इतिहास	–	–	३३,४५
इमं युवा	–	–	१३
इष्टका	–	–	२३

श्लोकांशाः			पृष्ठांकाः
उच्छिष्टमन्त्रं	–	–	७,४३
उच्छिष्टा	–	–	९
उत्थाय	–	–	२१
उदकं	–	–	१६
उदरे	–	–	२९
उद्धृताऽसि	–	–	२७
उपवास	–	–	६३
उपवीत	–	–	२८
उपेया	–	–	३४
ऊर्ध्वपुण्ड्रं	–	–	२९
ऊर्ध्वे	–	–	२४
एकमेव	–	–	५
एका	–	–	१७,१८
एकोद्दिष्टं	–	–	५०
एकोद्दिष्टवि.	–	–	५०
एकोद्दिष्टस्य	–	–	४८
एतच्चानुप	–	–	४८
एतानि	–	–	२७,३५,५९
एते वै	–	–	५६
एनं	–	–	२३
एवमेनं	–	–	६
एवं नारा	–	–	११
एवं शूद्रोऽपि	–	–	४७
एष एव	–	–	५,४७
ऐश्वर्य	–	–	२४

श्लोकांशाः			पृष्ठांकाः
कन्यावस्त्रं	–	–	६७
कपिला	–	–	१०
कल्यमु	–	–	१५
कांस्येन	–	–	२०
किं जपन्	–	–	३२
कुर्यादा	–	–	८
कुर्यान्मै	–	–	२०
कुहूसंक्रान्ति	–	–	३६
कुहूष	–	–	२२
केशव	–	–	१४
खदिर	–	–	२२
ख्यातिं	–	–	१२
गर्भाधाना	–	–	६५
गुदं	–	–	१६
गृहीत	–	–	१६
गृहे	–	–	२८
ग्रस्तोदये	–	–	४४
चक्राङ्कित	–	–	३०
चतुर्थे	–	–	३५
चन्दनेन	–	–	२९
चित्रासु	–	–	३६
जाते पुत्रे	–	–	६१
जानामि	–	–	१४
जीर्णान्यु	–	–	९
ज्ञातिबन्धु	–	–	३३

श्लोकांशाः			पृष्ठांकाः
तत्पृष्ठे	–	–	१७
ततश्चा	–	–	१९
तदर्द्धं	–	–	६३
तदर्थो	–	–	९
तस्यापि	–	–	९
तितिक्षु	–	–	१
तिस्त्रः कोट्यो	–	–	२७
तुलास्थे	–	–	५९
तुषाङ्गा	–	–	१६
तृतीये	–	–	३३
तेऽपि जाताः	–	–	५४
तेन	–	–	९
तेभ्यो	–	–	९
तेषामाप्या	–	–	३७
त्रिराचा	–	–	१९
त्रिविक्रमं	–	–	३०
त्रिविधैव	–	–	३२
त्रिंशद्दिनानि	–	–	६१
त्रैवर्णि	–	–	६७
दशमेऽह	–	–	६३
दशाह	–	–	६५
दशाहेन	–	–	६३
दातारो	–	–	५७
दृष्टमात्राः	–	–	३५
दृष्ट्वा	–	–	१६

श्लोकांशाः	पृष्ठांकाः
देवताभ्यः	५२,५५
देवाः यक्षा	३७
देये पितॄणां	५९
द्विजशु	७
धर्मेप्सवस्तु	१२,३१
न कोवि	२३
न चत्वरो	१६
न चन्द्र	४४
न चास्य	११
न चेह	३४
न जीर्ण	१५
न तेषां	१३
न दर्भा	१०,३२,३३
न दुष्ये	३४
न देव	४४
न नग्नो	४६
न निशायां	४४
नन्दिनीत्येव	२७
न पलाशं	२३
न पारि	२३
न पश्ये	१६
न पिछि	२३
न फाल	१५
न बन्धु	२३
न भार्या	४४

श्लोकांशाः			पृष्ठांकाः
न भिन्न	–	–	४४
न मधुर	–	–	२३
नमस्तुभ्यं	–	–	५४
नमस्कारे	–	–	३,१२
न मार्गा	–	–	१७
न मूत्रं	–	–	१५
न मृत्	–	–	४५
नर्मदायै	–	–	४६
नमोऽस्तु	–	–	१३
नमो विवस्वते	–	–	३१
न रिक्त	–	–	२८
न रात्रौ	–	–	४४
न लीनः	–	–	४६
न विवस्त्रो	–	–	४४
न शूद्राय	–	–	४,७
न शूद्रे	–	–	११
न श्लेष्मा	–	–	२३
न सस	–	–	१५
न हि	–	–	२,२२
नार्द्रपादो	–	–	४६
नार्द्धमेकं	–	–	२६
नाञ्जलिना	–	–	४५
नान्त्यजन	–	–	४४
नामानि	–	–	३०
नारायण	–	–	३०

श्लोकांशाः			पृष्ठांकाः
नाश्रुदर्शने	–	–	४४
निषिद्धा	–	–	१०
निष्पीड	–	–	२८
निषेके	–	–	४७
निहन्मि	–	–	५५
नीलेना	–	–	१३
नैकाकी	–	–	४४
नोच्चरे	–	–	१०,३१
नोच्छिष्टं	–	–	४३
नोच्छिष्ट	–	–	४५
नोत्कटभिन्ना	–	–	४४
नोपवीत	–	–	६६
पक्वतै	–	–	३६
पक्वमु	–	–	६६
पञ्चमी	–	–	३६
पञ्चार्द्र	–	–	४३
पञ्चाब्दिक	–	–	६४
पतितो	–	–	२४
पयांसि	–	–	४३
परिचर्या	–	–	९
पाकयज्ञैः	–	–	९
पाञ्चजन्य	–	–	३०
पितरो	–	–	४२,५०
पिता पिता	–	–	५०
पितृवाना	–	–	४८

श्लोकांशाः			पृष्ठांकाः
पितृभ्यः	–	–	५८
पितृभ्यो	–	–	५८
पितृश्राद्धे	–	–	३६
पित्रादि	–	–	२६
पुराणं	–	–	१,३३
पुराण	–	–	८
पुष्पेषु	–	–	५७
पूजये	–	–	११
पृष्ठतः	–	–	३०
पेयापेयेषु	–	–	१०
प्रकल्प्य	–	–	३४
प्रक्षाल्य	–	–	२४,२५
प्रत्यादि	–	–	१६
प्रतिपद्	–	–	२३
प्रथमं	–	–	१८
प्राक्द्रव्यं	–	–	४५
प्राङ्मुख	–	–	२४
प्राच्यां दिशि	–	–	४६
प्रातःकल्यं	–	–	१५
प्रातः द्विजा	–	–	३१
प्रातःस्नाना	–	–	२५
प्रौष्ठपद्या	–	–	४९
वल्मीक	–	–	१७
ब्रह्मक्षत्र	–	–	२६
ब्रह्माण्ड	–	–	३०

श्लोकांशाः			पृष्ठांकाः
ब्रह्मक्षत्रि	–	–	१२
ब्राह्मक्षत्र	–	–	३६
ब्राह्मणाः	–	–	४०
ब्राह्मणी	–	–	६२
ब्राह्मणो	–	–	६३
भक्ष्याभक्ष	–	–	४३
भागीरथी	–	–	२७
भार्यारतः	–	–	७
भार्यया	–	–	४४
भुक्तवाना	–	–	२०
भृत्यभरणम्	–	–	९
भोक्ष्यमा	–	–	१९
मांगल्यं	–	–	११
मध्यपात्रे	–	–	४४
मध्याह्न	–	–	२३
मधुचर्म	–	–	३४
मधुमांसै	–	–	५०
मातापिता	–	–	३३
माधवं	–	–	२९
मासेन	–	–	६२
मुखे	–	–	२०
मुहूर्त्तात्	–	–	४८
मृत्तिकां	–	–	१७
मृत्तिके	–	–	२७
मृतेऽहनि	–	–	६४

श्लोकांशाः			पृष्ठांकाः
म्रियते	–	–	६४
यः स्मरे	–	–	२८
य इदं	–	–	३२
यच्चाय	–	–	९
यत्किञ्चि	–	–	४९
यतीनां	–	–	३५
यथा यथा	–	–	१२
यदि पत्न्यां	–	–	६२
यदुत्सा	–	–	१४
यदुक्तं	–	–	१८
यव्यद्वयं	–	–	२६
यश्च	–	–	१३
यस्मिन्	–	–	१७
याम्यं हि	–	–	२५
येयं दीपा	–	–	५९
ये चाऽस्मत्	–	–	५५
ये चास्माकं	–	–	३८
येऽबान्धवाः	–	–	३८
येषां दाहो	–	–	५५
रोगान्तर	–	–	३६
लवणं	–	–	३४
ललाटे	–	–	२९,३०
लोकेऽस्मिन्	–	–	३५
लौकिके	–	–	३,४१
वर्जये	–	–	१६

श्लोकांशाः			पृष्ठांकाः
वसन्ताय	–	–	५६
वरं	–	–	४०
वल्मीक	–	–	१७
वापीकूप	–	–	१६
वामहस्त	–	–	१७
वारुणा	–	–	२६
वासयत	–	–	६६
विक्रीतान्	–	–	४३
विक्रीय	–	–	३४
विद्याधरी	–	–	२७
विद्याधरा	–	–	३७
विप्रश्चानु	–	–	६४
विप्रवा	–	–	७
विप्रैर्दग्धा	–	–	६३
विवाह	–	–	६,६६
विवाहादि	–	–	४७
विष्णोः पाद	–	–	२७
विलिखेत्	–	–	२९
वृत्त्यर्थं	–	–	३४
वैश्यस्य	–	–	१२
शयनादु	–	–	१४,४६
शक्तिं	–	–	३४
शिल्पं	–	–	९
शिवं	–	–	४०
शुचिभूतेन	–	–	५९

श्लोकांशाः			पृष्ठांकाः
शुचौ	–	–	१७
शुद्धिं सम	–	–	६५
शुद्ध्येद्	–	–	६१
शुद्ध्येर	–	–	४,१८
शूद्र	–	–	३२,६४
शूद्रश्च	–	–	९
शूद्रस्य	–	–	६,१०,१२,६६
शूद्रधर्मो	–	–	३४
शूद्राणां	–	–	१०,१३,६३
शूद्रानीतैः	–	–	३२
शूद्रा वाज	–	–	३,२४,३९
शूद्रेषु	–	–	३५
शूद्रोऽप्येवं	–	–	५,६,९,६५
शृतमन्त्रं	–	–	४४
शौचान्त	–	–	२४
शौचशु	–	–	१८
श्राद्धकर्म	–	–	९
श्राद्धस्यान	–	–	४२
श्राद्धे	–	–	२३
श्रावये	–	–	१,२
श्रीदामो	–	–	१
श्रोतव्यं	–	–	१,२
श्रोत्रियं	–	–	१५
षड्वर्षा	–	–	६४
सकृन्नारा	–	–	२८

श्लोकांशाः			पृष्ठांकाः
सनकश्च	–	–	३७
सर्पापसर्प	–	–	४६
सप्तव्याधा	–	–	५४
सप्तमे	–	–	६३
सवर्णेभ्यः	–	–	७
सर्वम	–	–	२५
सव्येन	–	–	३४
सर्वाशी	–	–	३४,४३
सर्वेषामेव	–	–	६४
सर्वे	–	–	२२
सर्वे ते	–	–	३७
सर्वे वा	–	–	६५
संसार	–	–	१४,३०
साधु वा	–	–	१४
सुदर्शन	–	–	३०
सूतके	–	–	६१,६२
सूतिका	–	–	६२
सूतिकां	–	–	६२
सूर्यग्रहे	–	–	४४
सूर्योदयं	–	–	२५
सोमरा	–	–	२१
सौरभेय्यः	–	–	४२
स्तोतव्या	–	–	५६
स्त्रीशूद्र	–	–	१३,१९
स्त्रियो	–	–	३२

श्लोकांशाः			पृष्ठांकाः
स्नातोऽधि	–	–	२५
स्नातश्च	–	–	२९
स्नानं	–	–	२६
स्वकुटुम्ब	–	–	३४,
स्वदार	–	–	९
स्वस्य योनिः	–	–	६७
स्वस्तिवाच्यः	–	–	४७
स्वाहा	–	–	४०
हेमन्ताय	–	–	५६
हृत्तापकीर्त्ति	–	–	३६

–o–

(ख) शूद्राह्निकपद्धतौ उद्धृतानां ग्रन्थानां ग्रन्थकाराणां च सूची

अङ्गिराः
अर्वांचाः
आपस्तम्बः
ऋष्यशृङ्गः
कल्पतरुः
क्रमदीपिका
कपिलस्मृतिः
कामधेनुः
कालादर्शः
कुल्लूकभट्टः
कोषः
गौतमः
गौडाः
गृह्य
चिन्तामणिः
जैमिनिः
जैमिनीयरामायणम्
दक्षः
देवलः
नृसिंहपुराणम्
पद्मपुराणम्
परिशिष्टम्
पूर्वोत्तरमीमांसा
पैठीनसिः
बौधायनः
बृहस्पतिः
ब्रह्मपुराणम्
भगवद्गीता
भविष्यपुराणम्
भाष्यकृत्
मनुः
महाभारतम्
मत्स्यपुराणम्
मीमांसकसिद्धान्तरहस्यम्
मेधातिथिः
यमः
याज्ञवल्क्यः
याज्ञवल्क्यसंहिता
लक्ष्मीधरः
वराहपुराणम्
वाजसनेयी
वार्त्तिककारः

वायुपुराणम्

विज्ञानेश्वरः

विद्यानिवासः

विवेकः

विष्णुपुराणम्

विष्णुसहस्रनाम

शंखः

शुद्धिगुच्छकारः

शुद्धिचान्द्रका

शुद्धिविवेकः

संवर्त्तः

स्मृत्यन्तरम्

हारीतः

—o—

(ग) सहायकग्रन्थसूची

१. अमरकोषः – चौखम्बा संस्कृत सीरीज्, वाराणसी, १९७०

२. आचारसारः – गदाधरराजगुरुकृतः, एसिआटिक् सोसाइटि आफ् वेङ्गल, कलिकता – १९०८

३. उत्कलीयधर्मशास्त्र – भगवानपण्डा, ग्रन्थप्रकाशनी, कटक, १९८५

४. ओडिशार सांस्कृतिक इतिहास– कलचराल फोरम, भुवनेश्वर, १९७८

५. कालदीपः – दिव्यसिंहमहापात्रकृतः, पण्डितकुलमणिमिश्र–सम्पादितः, नारायणप्रेस, पुरी, १९८२

६. कालमाधवः – माधवाचार्यकृतः, चौखम्बा संस्कृत संस्थान, वाराणासी, १९८९

७. कालसारः – गदाधरराजगुरुकृतः, राधारमणपुस्तकालयः, कटक

८. कृत्यकल्पतरुः – लक्ष्मीधरभट्टकृतः, गायकवाड ओरियण्टाल सिरिज, वरोदा, १९५०

९. कृत्यकौमुदी – बृहस्पतिकृता, डॉ. जयकृष्णमिश्रसम्पादिता, नारायणप्रेस, पुरी, १९८९

१०. खुरुधा इतिहास – केदारनाथमहापात्रः, ग्रन्थमन्दिर, कटक, १९८४

११. गौतमधर्मसूत्रम् – पण्डितकुलमणिमिश्रसम्पादितम्, नारायणप्रेस, पुरी, १९९१

१२. जैमिनीयन्यायमाला – माधवाचार्यः, विद्यारण्य विद्यापीठ, बम्बे, १९८३

१३. जैमिनिसूत्रम् – आनन्दाश्रममुद्रणालयः, पुना, १९७६

१४. दक्षस्मृतिः – स्मृतिसन्दर्भः, नागप्रकाशक, दिल्ली, १९८८

१५. नरसिंहपुराणम् – गीताप्रेस्, गोरखपुरम् ।

१६. पद्मपुराणम् – नागपब्लिशर्स, दिल्ली, १९८३

१७. पारस्करगृह्यसूत्रम् – पण्डितकुलमणिमिश्रसम्पादितम्, प्रका. श्रीसदाशिव–केन्द्रीयसंस्कृतविद्यापीठम्, पुरी, १९८१

१८. भगवद्गीता – गीताप्रेस्, गोरखपुरम् ।

१९. भविष्यपुराणम् – नागपब्लिशर्स, दिल्ली, १९८४

२०. मनुस्मृतिः – मन्वर्थमुक्तावलीसहिता, मोतिलालवनारसीदास, वाराणसी, १९९०

२१. मत्स्यपुराणम् – मेहेरचन्द लछमनदास, दिल्ली, १९८४
२२. महाभारतम् – गीताप्रेस्, गोरखपुरम् ।
२३. मादलापाञ्जि – मृत्युञ्जयनायकसम्पादितः, फ्रेण्डस् पब्लिशर्स, कटक, १९९३
२४. याज्ञवल्क्यस्मृतिः – (मिताक्षरासहिता) नागपब्लिशर्स, दिल्ली, १९८५
२५. वसिष्ठधर्मशास्त्रम् – भण्डारकर प्राच्यविद्यासंशोधनागार, पुना, १९३०
२६. विष्णुधर्मसूत्रम् – जुलियसजोलिसम्पादितम्, चौखम्बा संस्कृत सीरीज्, वाराणसी, १९६२
२७. विष्णुपुराणम् – गीताप्रेस्, गोरखपुरम्, १९७२
२८. शङ्खस्मृतिः – स्मृतिसन्दर्भः, नाग पब्लिशर्स, दिल्ली, १९८८
२९. शुद्धिचन्द्रिका – (शान्तिरथ टीकासहिता), सं– डॉ. जयकृष्णमिश्रः, रमा प्रेस, पुरी, २००२
३०. श्राद्धप्रदीपः – विप्रमिश्रकृतः, सं. डॉ. व्रजकिशोरस्वाईं, अरुणिमा प्रिण्टिंग वर्क्स, कलिकता, १९८२

—०—